અથવા, સામાયિકક્રિયાનું પ્રત્યર્પણ જણાવનાર આ ભદન્ત શબ્દ છે. આ શબ્દના ગ્રહણ દ્વારા એ વાત જણાવેલી થાય છે કે—સર્વ ક્રિયા પૂર્ણ થયા બાદ ગુરુને તેનું પ્રત્યર્પણ કરવું જોઈએ. (અર્થાત્ ''પૂર્વે જે સામાયિક ક્રિયાનો આરંભ કર્યો હતો, તે મેં પૂર્ણ કર્યું છે'' એ પ્રમાણે સામાયિકની ક્રિયાનું પ્રત્યર્પણ જણાવનાર આ શબ્દ છે.) ભાષ્યકારે કહ્યું છે - 'અથવા સામાયિક ક્રિયાનું પ્રત્યર્પણ જણાવનાર આ ભદન્ત શબ્દ છે. આનાવડે સર્વ ક્રિયાઓના અંતે પ્રત્યર્પણ કરવું જોઈએ એમ કહેવાયેલું થાય છે. ॥૧॥ **(વિ.આ.ભા. ૩૫૭૧)** પ્રાસંગિક ચર્ચાવડે સર્યું.

અવતરણિકા : 'પ્રતિક્રમામિ' શબ્દમાં પ્રતિક્રમણ એટલે મિથ્યાદુષ્કૃત. તે પ્રતિક્રમણ બે પ્રકારનું છે – દ્રવ્યથી અને ભાવથી. આ વાતને જ નિર્યુક્તિકાર કહે છે ⇨

ગાથાર્થ : દ્રવ્યમાં નિહ્નવાદિનું પ્રતિક્રમણ જાણવું. અહીં કુંભારના મિચ્છા મિ દુક્કડંનું ઉદાહરણ છે. ભાવપ્રતિક્રમણમાં ઉપયુક્ત જીવનું પ્રતિક્રમણ જાણવું. અહીં મૃગાવતીજીનું ઉદાહરણ છે.

ટીકાર્થ : 'દ્રવ્ય' શબ્દ દ્વાર જણાવનારો છે. તેથી દ્રવ્યપ્રતિક્રમણ તરીકે નિહ્નવાદિ જાણવા. અહીં પ્રતિક્રમણ અને પ્રતિક્રમણવાળાનો અભેદ ઉપચાર કરેલો હોવાથી નિહ્નવાદિના પ્રતિક્રમણને દ્રવ્યપ્રતિક્રમણ કહેવાને બદલે નિહ્નવાદિને જ દ્રવ્યપ્રતિક્રમણ કહ્યું છે. આદિશબ્દથી અનુપયુક્ત સાધુ વિગેરે જાણવા. અહીં કુલાલનું મિથ્યાદુષ્કૃત ઉદાહરણ તરીકે જાણવું. તે આ પ્રમાણે – એક કુંભારની શાળામાં સાધુઓ રહ્યા. તેમાં એક બાળસાધુ તે કુંભારના માટીના વાસણોને આંગળીથી બનાવેલા ધનુષવડે (અર્થાત્ અંગુઠો અને તર્જની આંગળીએ દોરો બાંધી) પથ્થરોવડે ફોડે છે. કુંભારે ઉઠીને બાળસાધુને વાસણો ફોડતા જોયા. તેણે કહ્યું – 'શા માટે તમે મારા વાસણોને કાણા પાડો

---

३१. सामायिकप्रत्यर्पणवचनो वाऽयं भदन्तशब्द इति । सर्वक्रियावसाने भणितं प्रत्यर्पणमनेन ॥१॥

३२. एकस्य कुम्भकारस्य कुट्यां (गृहे) साधवः स्थिताः, तत्रैकः क्षुल्लकस्तस्य कुम्भकारस्य भाजनानि अङ्गुलधनुषा पाषाणैः काणीकरोति, कुम्भकारेण प्रतिजागर्य दृष्टः, भणितश्च—कथं मम भाजनानि

[33]काणेसि ?, खुड्डुओ भणइ–मिच्छा मि दुक्कडंति, एवं सो पुणो पुणो विंधिऊण मिच्छा मि दुक्कडं देइ, पच्छा कुंभगारेण तस्स खुड्डुगस्स कन्नामोडओ दिन्नो, सो भणइ–दुक्खाविओऽहं, कुंभगारो भणइ–मिच्छा मि दुक्कडं, एवं सो पुणो पुणो कन्नामोडियं दाऊण मिच्छा दुक्कडंति करेइ, पच्छा चेल्लओ भणइ–अहो सुंदरं मिच्छा मि दुक्कडंति, कुंभगारो भणइ–तुज्झवि एरिसं चेव मिच्छा दुक्कडंति, पच्छा ठिओ विंधियव्वस्स ।

''जं दुक्कडंति मिच्छा तं चेव णिसेवई पुणो पावं ।
पच्चक्खमुसावाई मायाणियडिप्पसंगो य ॥१॥ ''

एयं दव्वपडिक्कमणं ॥ भावप्रतिक्रमणं प्रतिपादयति—भाव इति द्वारपरामर्श एव, 'तदुपयुक्त एव' तस्मिन्–अधिकृते शुभव्यापारे उपयुक्तस्तदुपयुक्तो यत् करोति, मृगावतिः तत्रोदाहरणं, तच्चेदम्–

[34]भगवं वद्धमाणसामी कोसंबीए समोसरिओ, तत्थ चंदसूरा भगवंतं वंदगा सविमाणा ओइण्णा,

---

છો ?' બાળસાધુએ કહ્યું – મિચ્છા મિ દુક્કડં. થોડીવાર પછી એ જ પ્રમાણે કાણા પાડીને મિચ્છા મિ દુક્કડં માંગ્યું. પાછળથી તે કુંભારે સાધુના કાન મરોડ્યા. બાળ સાધુએ કહ્યું – 'મને પીડા થાય છે.' કુંભારે મિચ્છા મિ દુક્કડં માંગ્યું. ફરી ફરી તે કુંભાર કાન મરોડીને મિચ્છા મિ દુક્કડં કરે છે. આ જોઈ પછીથી બાળસાધુએ કહ્યું – "અહો ! બહુ સરસ મિચ્છા મિ દુક્કડં કરો છો." કુંભારે કહ્યું – "તમારું પણ આવા પ્રકારનું જ મિચ્છા મિ દુક્કડં છે." આ સાંભળી સાધુને પોતાની ભૂલ દેખાતા કાણા પાડવાનું અટકાવી દીધું. કહ્યું છે – "જે પાપનું મિચ્છા મિ દુક્કડં કર્યા પછી તે જ પાપ જો ફરીથી સેવે તો, તે જીવ પ્રત્યક્ષમૃષાવાદી છે. તેને માયા (અભ્યંતર અસત્યપણું) અને નિકૃતિ (બાહ્ય અસત્યપણું)નો પ્રસંગ થાય છે અર્થાત્ તે બંને પ્રકારનો અસત્યવાદી જાણવો." (ઉપદેશમાળા-૫૦૭)

હવે ભાવપ્રતિક્રમણનું પ્રતિપાદન કરે છે –'ભાવ' શબ્દ દ્વાર જણાવનારો જ છે. અધિકૃત એવા શુભવ્યાપારમાં ઉપયુક્ત વ્યક્તિ જે પ્રતિક્રમણ કરે છે તે ભાવપ્રતિક્રમણ કહેવાય છે. અહીં મૃગાવતીજીનું ઉદાહરણ જાણવું.

❋ મિચ્છા મિ દુક્કડં – મૃગાવતી ❋

ભગવાન વર્ધમાનસ્વામી કોશાંબીનગરીમાં પધાર્યા. ત્યાં ચંદ્ર-સૂર્યદેવ ભગવાનને વંદન કરવા માટે પોતાના વિમાન સાથે નીચે આવ્યા. ત્યાં ઉદાયનરાજાની માતા સાધ્વી મૃગાવતીજી દિવસ

---

૩૩. काणयसि ?, क्षुल्लको भणति–मिथ्या मे दुष्कृतमिति, एवं स पुनः पुनः काणयित्वा मिथ्या मे दुष्कृतं ददाति पश्चात् कुम्भकारेण तस्य क्षुल्लकस्य कर्णामोटको दत्तः, स भणति–दुःखितोऽहं, कुम्भकारो भणति–मिथ्या मे दुष्कृतं, एवं स पुनः पुनः कर्णामोटकं दत्त्वा मिथ्या दुष्कृतमिति करोति, पश्चात्क्षुल्लको भणति–अहो सुन्दरं मिथ्या मे दुष्कृतमिति, कुम्भकारो भणति–तवापि ईदृशमेव मिथ्या मे दुष्कृतमिति, पश्चात्स्थितः काणनात्-। यद्दुष्कृतमिति मिथ्या (कृत्वा) तदेव निषेवते पुनः पापम्। प्रत्यक्षमृषावादी मायानिकृतिप्रसङ्गश्च ॥१॥ एतद्द्रव्यप्रतिक्रमणं ।

૩૪. भगवान् वर्धमानस्वामी कौशाम्ब्यां समवसृतः, तत्र चन्द्रसूर्यौ भगवन्तं वन्दितुं सविमानावतीर्णौ,

[૩૫]તત્થ મિયાવઈ અજ્જા ઉદયણમાયા દિવસોત્તિકાઉં ચિરં ઠિયા, સેસાઓ સાહુણીઓ તિત્થયરં વંદિઊણ સનિલયં ગયાઓ, ચંદસૂરાવિ તિત્થયરં વંદિઊણ પડિગયા, સિઘ્ઘમેવ વિયાલીભૂયં, મિયાવઈ સંભંતા, ગયા અજ્જચંદણાસગાસં । તાઓ ય તાવ પડિક્કંતાઓ, મિયાવઈ આલોએઉં પવત્તા, અજ્જ-ચંદણાએ ભણ્ણઇ–કીસ અજ્જે ! ચિરં ઠિયાસિ ?, ન જુત્તં નામ તુમં ઉત્તમકુલપ્પસૂયાએ એગાગિ-ણીએ ચિરં અચ્છિઉંતિ, સા સબ્ભાવેણ મિચ્છા મિ દુક્કડંતિ ભણમાણી અજ્જચંદણાએ પાએસુ પડિયા, અજ્જચંદણા ય તાએ વેલાએ સંથારં ગયા, તાહે નિદ્દા આગયા, પસુત્તા, મિયાવઈએવિ તિવ્વસંવેગમા-વણ્ણાએ પાયપડિયાએ ચેવ કેવલણાણં સમુપ્પણ્ણં । સપ્પો ય તેણંતેણમુવાગઓ, અજ્જચં-દણાએ ય સંથારગાઓ હત્થો ઓલંબિઓ, મિયાવઈએ મા ખજ્જિહિતિત્તિ સો હત્થો સંથારગં ચડાવિઓ, સા વિઉદ્ધા ભણઇ–કિમેયંતિ ?, અજ્જવિ તુમં અચ્છસિત્તિ મિચ્છા મિ દુક્કડં, નિદ્દપ્પમાએણં

છે એમ સમજીને લાંબાકાળ સુધી ત્યાં જ રહ્યા. (કારણ કે સૂર્ય પોતાના મૂળ વિમાન સાથે આવેલ હોવાથી ત્યાં રાત હોવા છતાં પ્રકાશને કારણે દિવસ જ લાગતો હતો.) શેષ અન્ય સાધ્વીજીઓ તીર્થંકરને વંદન કરીને પોતાના સ્થાને ગયા. એવામાં ચંદ્ર-સૂર્ય પણ તીર્થંકરને વંદન કરીને પાછા ફર્યા. તેથી ત્યાં તરત જ અંધારું થઈ ગયું. મૃગાવતીજી ગભરાઈ ગયા અને ચંદનાસાધ્વીજી પાસે ગયા. ત્યાં બધા સાધ્વીજીઓએ પ્રતિક્રમણ કરી લીધું હતું. મૃગાવતીએ પ્રતિક્રમણ કરવાનું શરૂ કર્યું. તેથી ચંદનાસાધ્વીજીએ કહ્યું – 'હે સાધ્વીજી ! તમે કેમ લાંબાકાળથી ત્યાં રહ્યા હતા ? તમારા જેવા ઉત્તમકુળમાં ઉત્પન્ન થયેલાને એકલા આટલી બધી વાર ત્યાં રહેવું યોગ્ય નથી.'

મૃગાવતીજી પૂર્ણ સદ્ભાવવડે મિચ્છા મિ દુક્કડં બોલતા ચંદનાસાધ્વીજીના પગમાં પડ્યા. તે વેળાએ ચંદનાસાધ્વીજી સંથારા ઉપર બેઠા હતા. એવામાં એમને નિદ્રા આવી. તેઓ સૂઈ ગયા. તીવ્ર સંવેગભાવને પામેલા અને પગમાં પડેલા મૃગાવતીજીને તે જ સમયે કેવલજ્ઞાન ઉત્પન્ન થયું. એવામાં સંથારાની બાજુમાંથી એક સાપ પસાર થતો હતો. ચંદનાસાધ્વીજીનો એક હાથ સંથારાથી બહાર આવેલો હતો. મૃગાવતીજીએ સાપ ડંખ ન મારે તે માટે તેમનો હાથ સંથારા ઉપર ચઢાવ્યો. એટલે તરત જ જાગેલાં એવા ચંદનાસાધ્વીજીએ મૃગાવતીજીને કહ્યું – "અરર ! તમે હજુ અહીં જ છો, મારું મિચ્છા મિ દુક્કડં, નિદ્રાપ્રમાદને કારણે મેં તમને જવા માટેની રજા આપી નહિ."

---

૩૫. तत्र मृगावती आर्योदयनमाता दिवस इतिकृत्वा चिरं स्थिता, शेषाः साध्व्यस्तीर्थकरं वन्दित्वा स्वनिलयं गताः, चन्द्रसूर्यावपि तीर्थकरं वन्दित्वा प्रतिगतौ, शीघ्रमेव विकालीभूतं, मृगावती संभ्रान्ता, गता आर्यचन्दनासकाशं । ताश्च तावत्प्रतिक्रान्ताः, मृगावत्यालोचितुं प्रवृत्ता, आर्यचन्दनया भण्यते–कथमार्ये ! चिरं स्थिताऽसि ?, न युक्तं नाम तव उत्तमकुलप्रसूताया एकाकिन्याः चिरं स्थातुमिति, सा सद्भावेन मिथ्या मे दुष्कृतमिति भणन्ती आर्यचन्दनायाः पादयोः पतिता, आर्यचन्दना च तस्यां वेलायां संस्तारके स्थिता, तदा निद्राऽऽगता, प्रसुप्ता, मृगावत्या अपि तीव्रसंवेगमापन्नायाः पादपतिताया एव केवलज्ञानं समुत्पन्नं । सर्पश्च तेन मार्गेणोपागतः, आर्यचन्दनायाश्च हस्तः संस्तारकादवलम्बितः, मृगावत्या मा खादीदिति स हस्तः संस्तारके चटापितः, सा विबुद्धा भणति–किमेतदिति, अद्यापि त्वं तिष्ठसीति मिथ्या मे दुष्कृतं, निद्राप्रमादेन

[36]णे उट्ठावियासि, मियावई भणइ–एस सप्पो मा भे खाहिइत्ति अतो हत्थो चडाविओ, सा भणइ–कहिं सो ?, सा दाएइ, अज्जचंदणा अपेच्छमाणी भणइ–अज्जे ! किं ते अइसओ ?, सा भणइ–आमं, तो किं छाउमत्थिओ केवलिओत्ति ?, भणइ–केवलिओ, पच्छा अज्जचंदणा पाएसु पडिऊण भणइ–मिच्छा मि दुक्कडंति, केवली आसइओत्ति, इयं भावपडिक्कमणं । एत्थ गाहा–

"जइ य पडिक्कमियव्वं अवस्स काऊण पावयं कम्मं ।
तं चेव न कायव्वं तो होइ पए पडिक्कंतो ॥१॥"

त्ति गाथार्थः ॥१०४८॥ इह च प्रतिक्रमामीति भूतात् सावद्ययोगान्निवर्तेऽहमित्युक्तं भवति, तस्माच्च निर्वृत्तिर्यत्तदनुमतेर्विरमणमिति, तथा निन्दामीति गर्हामि, अत्र निन्दामीति जुगुप्से इत्यर्थः गर्हामीति च तदेवोक्तं भवति, एवं तर्हि को भेद एकार्थत्वे ?, उच्यते, सामान्यार्थभेदेऽपीष्टविशेषार्थो

મૃગાવતીજીએ કહ્યું – "આ સાપ આપને ડંખ ન મારે માટે મેં આપનો હાથ સંથારા ઉપર ચઢાવ્યો." ચંદનાસાધ્વીજીએ પૂછ્યું – "ક્યાં છે સાપ ?" મૃગાવતીજીએ સાપને દેખાડ્યો. પરંતુ સાપને નહિ જોતા એવા ચંદનાસાધ્વીજીએ પૂછ્યું "હે સાધ્વી ! શું તમને કોઈ અતિશય પ્રાપ્ત થયો છે ? (કે જેથી આવા ઘોર અંધકારમાં પણ તમને સાપ દેખાય છે.)" મૃગાવતીજીએ કહ્યું – "હા." ચંદનાસાધ્વીજીએ પૂછ્યું– " શું છદ્મસ્થાવસ્થાનો અતિશય છે કે કેવલીઅવસ્થાનો ?' મૃગાવતીજીએ કહ્યું – "કેવલી અવસ્થાનો." પછીથી ચંદનાસાધ્વીજી મૃગાવતીના પગમાં પડીને મિચ્છા મિ દુક્કડં માંગે છે – "મેં કેવલીની આશાતના કરી, મારું મિચ્છા મિ દુક્કડં." આ ભાવપ્રતિક્રમણ થયું.

અહીં આ ગાથા જાણવી કે – "જો પાપ કરીને તેનું પ્રતિક્રમણ અવશ્ય કરવાનું જ હોય તો પાપ ન કરવું એ જ ઉત્સર્ગ માર્ગે પ્રતિક્રમણ છે. પાપ ન કરનાર વ્યક્તિ જ ઉત્સર્ગમાર્ગે પ્રતિક્રાન્ત છે. ॥૧॥" ॥૧૦૪૮॥ અહીં 'પ્રતિક્રમામિ' એટલે હું ભૂતકાળના સાવદ્યયોગોથી પાછો ફરું છું' અને તેથી પાછા ફરવારૂપ જે નિવૃત્તિ છે તેનો અર્થ 'અનુમતિથી અટકવું.' (ટૂંકમાં પ્રતિક્રમામિ એટલે ભૂતકાળમાં સેવાયેલા પાપોથી હું પાછો ફરું છું અર્થાત્ તે પાપોની અનુમોદના કરતો નથી. આ પ્રમાણે **પ્રતિક્રમામિ** શબ્દનો વિસ્તારથી અર્થ કહ્યો.)

હવે નિન્દામિ અને ગર્હામિ બે શબ્દો છે. તેમાં નિન્દામિ અને ગર્હામિ બંને જુગુપ્સા અર્થમાં જ છે એટલે કે હું જુગુપ્સા કરું છું, અર્થાત્ તિરસ્કાર કરું છું.

શંકા : જો નિન્દામિ અને ગર્હામિ નો એક જ અર્થ થતો હોય તો બેમાં તફાવત શું છે ?

સમાધાન : સામાન્યથી અર્થનો અભેદ હોવા છતાં પણ ઈષ્ટ એવા વિશેષઅર્થવાળો ગર્હાશબ્દ

---

૩૬. नोत्थापिताऽसि, मृगावती भणति–एष सर्पो मा भवन्तं खादीदिति भावत्को (अतो) हस्तश्चटापितः, सा भणति–क्व सः ?, सा दर्शयति, आर्यचन्दना अपश्यन्ती भणति–आर्ये किं तवातिशयः ?, सा भणति–ओम्, तर्हि किं छाद्मस्थिकः कैवलिक इति ?, भणति–कैवलिकः, पश्चादार्यचन्दनापादयोः पतित्वा भणति–मिथ्या मे दुष्कृतमिति केवल्याशातित इति, इदं भावप्रतिक्रमणं । अत्र गाथा–यदि च प्रतिक्रान्तव्यमवश्यं कृत्वा पापकं कर्म । तदेव न कर्त्तव्यं तदा भवति पदे प्रतिक्रान्तः ॥१॥ इति

गर्हाशब्दः, यथा सामान्ये गमनार्थे गच्छतीति गौः, सर्पतीति सर्पः, तथाऽपि गमनविशेषोऽवगम्यते शब्दार्थादेव, एवमिहापि निन्दागर्हयोरिति ॥

तं चार्थविशेषं दर्शयति—

सचरित्तपच्छ्यावो निंदा तीए चउक्कनिक्खेवो ।
दव्वे चित्तयरसुआ भावेसु बहू उदाहरणा ॥१०४९॥

व्याख्या : सचरित्रस्य सत्त्वस्य पश्चात्तापो निन्दा, स्वप्रत्यक्षं जुगुप्सेत्यर्थः, उक्तं च– *"आत्मसाक्षिकी निन्दा"* "तीए चउक्कनिक्खेवो"त्ति तस्यां तस्या वा नामादिभेदचतुष्को निक्षेप इति, तत्र नामस्थापने अनादृत्याऽऽह—'दव्वे चित्तकरसुया भावेसु बहू उदाहरण'त्ति द्रव्यनिन्दायां चित्रकरसुतोदाहरणं, [३७]सा जहा रण्णा परिणीया अप्पाणं णिंदियाइयत्ति, भावनिन्दायां सुबहून्युदाहरणानि योगसङ्ग्रहेषु वक्ष्यन्ते, लक्षणं पुनरिदं—

"[३८]हा ! दुट्ठु कयं हा ! दुट्ठु कारियं दुट्ठु अणुमयं इत्ति ।
अंतो अंतो डज्झइ पच्छातावेण वेवंतो ॥१॥"त्ति

गाथार्थः ॥१०४९॥

જાણવો. જેમ કે—જે જાય છે તે ગાય, જે સરકે છે તે સાપ. અહીં સામાન્યથી ગમન અર્થમાં ગાય અને સર્પ શબ્દ હોવા છતાં સર્પ શબ્દ વિશેષપ્રકારની ગમન પદ્ધતિને જણાવનાર છે, તેમ અહીં પણ નિંદા અને ગર્હા શબ્દોનો સામાન્ય અર્થ એક હોવા છતાં ગર્હાશબ્દ વિશેષઅર્થને જણાવનાર છે.

અવતરણિકા : તે વિશેષ અર્થને જ બતાવે છે ⇨

ગાથાર્થ : ચારિત્રવાળાનો પશ્ચાત્તાપ એ નિંદા છે. તેના ચાર નિક્ષેપા છે. દ્રવ્યમાં ચિત્રકારની પુત્રીનું ઉદાહરણ જાણવું અને ભાવમાં ઘણા ઉદાહરણો છે.

ટીકાર્થ : ચારિત્રયુક્ત જીવનો જે પશ્ચાતાપ તે નિંદા છે અર્થાત્ આત્મસાક્ષીએ નિંદા કરવી તે નિંદા. કહ્યું છે, 'નિંદા આત્મસાક્ષિકી છે'. નિંદાને વિશે અથવા નિંદાના નામાદિ ચાર નિક્ષેપ છે. તેમાં નામ, સ્થાપના સુગમ હોવાથી તેને છોડીને કહે છે – દ્રવ્યનિંદામાં ચિત્રકારની પુત્રીનું ઉદાહરણ જાણવું.

રાજા સાથે પરણ્યા પછી એકાન્તમાં તે જે રીતે પોતાની જાતને નિંદતી હતી તે રીતે અહીં સમજી લેવું. (આ દૃષ્ટાન્ત આગળ પ્રતિક્રમણ અધ્યયનમાં ગા. ૧૨૪૨માં છે.) ભાવનિંદામાં ઘણા બધાં ઉદાહરણો છે. જે આગળ યોગસંગ્રહમાં કહેવાશે. નિંદાનું લક્ષણ આ પ્રમાણે જાણવું – "હા ! ખોટું કર્યું, હા ! ખોટું કરાવ્યું, હા ! ખોટું અનુમોદ્યું. આ પ્રમાણે પશ્ચાત્તાપવડે ધ્રુજતો મનમાં ને મનમાં બળ્યા કરે છે. ॥૧॥." ॥ ૧૦૪૯ ॥

३७ सा यथा राज्ञा परिणीताऽऽत्मानं निन्दितवतीति ।

३८. हा ! दुट्ठु कृतं हा ! दुट्ठु कारितं दुष्ठ्वनुमतं इति । अन्तरन्तर्दह्यते पश्चात्तापेन चैवान्तः (वेपन्) ॥१॥ इति ।

गरहावि तहाजाईअमेव नवरं परप्पगासणया ।
दव्वंमि मरुअनायं भावे सुबहू उदाहरणा ॥१०५०॥

व्याख्या : गर्हाऽपि 'तथाजातीयैवे'ति निन्दाजातीयैव, नवरमेतावान् विशेषः—परप्रकाशनया गर्हा भवति, या गुरोः प्रत्यक्षं जुगुप्सा सा गर्हेति, *'परसाक्षिकी गर्हे'*ति वचनाद्, असावपि चतुर्विधैव, तत्र नामस्थापने अनादृत्यैवाह—'दव्वंमि मरुअणायं भावे सुबहू उदाहरण'त्ति । तत्र द्रव्यगर्हायां मरुकोदाहरणं, तच्चेदम्—ऐंआणंदपुरे मरुओ ण्हुसाए समं संवासं काऊण उवज्झायस्स कहेइ जहा सुविणए ण्हुसाए समं संवासं गओमित्ति । भावगर्हाए साधू उदाहरणं—

"गंतूण गुरुसगासे काऊण य अंजलिं विणयमूलं ।
जह अप्पणो तह परे जाणावण एस गरहा उ ॥१॥"

त्ति गाथार्थः ॥१०५०॥

तत्र निन्दामि गर्हामीत्यत्र गर्हा जुगुप्सोच्यते, तत्र किं जुगुप्से ?, 'आत्मानम्' अतीत-सावद्ययोगकारिणमश्लाघ्यम्, अथवाऽत्राणम्—अतीतसावद्ययोगं त्राणविरहितं जुगुप्से, सामायिकेनाधुना त्राणमिति, अथवा 'अत सातत्यगमने' अतनं—अतीतसावद्ययोगं सततभवनप्रवृत्तं

ગાથાર્થ : ગર્હા પણ નિંદા સમાન જ છે છતાં બીજાને કહેવાવડે ગર્હા થાય છે. દ્રવ્યમાં બ્રાહ્મણનું દૃષ્ટાન્ત અને ભાવમાં ઘણા ઉદાહરણો છે.

ટીકાર્થ : ગર્હા પણ નિંદા સમાન જ છે. પરંતુ આટલો તફાવત જાણવો કે - પરપ્રકાશ વડે ગર્હા થાય છે, અર્થાત્ ગુરુની સાક્ષિએ પોતાના અતિચારોની જે નિંદા તે ગર્હા કહેવાય છે. કહ્યું છે - 'પરસાક્ષિકી ગર્હા હોય.' આ ગર્હા પણ ચાર પ્રકારે છે. તેમાં નામ, સ્થાપનાને છોડીને જણાવે છે. દ્રવ્યગર્હામાં બ્રાહ્મણનું ઉદાહરણ—આનંદપુર નગરમાં એક બ્રાહ્મણ પોતાની પુત્રવધૂ સાથે રાત્રિ પસાર કરીને ઉપાધ્યાય પાસે ગર્હા કરવા બોલે છે કે 'મેં સ્વપ્નમાં પુત્રવધૂ સાથે રાત્રિ પસાર કરી.' એની આ ગર્હા ખોટી હોવાથી દ્રવ્યગર્હા કહેવાય છે.

ભાવગર્હામાં સાધુનું ઉદાહરણ જાણવું — ગુરુ પાસે જઈને વિનયપૂર્વક અંજલિ જોડીને જે રીતે પોતાને પાપનું જ્ઞાન છે તે રીતે બીજાને=ગુરુને પાપ જણાવવું તે ગર્હા કહેવાય છે. (ઓઘનિર્યુક્તિ-૧૫૮) ॥૧૦૫૦॥

'નિંદામિ, ગર્હામિ' અહીં જુગુપ્સાને ગર્હા કહેવાય છે. કોની જુગુપ્સા હું કરું છું ? તે કહે છે — અતીતકાળમાં સાવદ્યયોગને કરનારા અપ્રશંસનીય આત્માની અથવા અત્રાણ એટલે કે સંસારના ભયથી બચાવવા માટે અસમર્થ, માટે જ ત્રાણથી રહિત એવા અતીત સાવદ્યયોગની હું જુગુપ્સા કરું છું, કારણ કે હવે સામાયિકવડે મારું રક્ષણ થશે. (ભાવાર્થ છે કે - હવે રક્ષણ કરનાર એવું સામાયિક પ્રાપ્ત થયા પછી ત્રાણ રહિત એવા અતીત સાવદ્યયોગની હું નિંદા કરું છું) અથવા अत् ધાતુ 'સતત ગમન કરવું' અર્થમાં છે. તેથી અતનને='સતત થવામાં પ્રવૃત્ત એવા

૩૯. आनन्दपुरे मरुकः स्नुषया समं संवासं कृत्वा उपाध्यायाय कथयति, यथा स्वप्ने स्नुषया समं संवाशं गतोऽस्मीति । भावगर्हायां साधुरुदाहरणम्—गत्वा गुरुसकाशं कृत्वा चाञ्जलिं विनयमूलम् । यथाऽऽत्मनस्तथा परेषां ज्ञापनमेषा गर्हा तु ॥१॥

निवर्तयामीति, 'व्युत्सृजामी'ति विविधार्थो विशेषार्थो वा विशब्दः उच्छब्दो भृशार्थः सृजामि–त्यजामीत्यर्थः, विविधं विशेषेण वा भृशं त्यजामिव्युत्सृजामि अतीतसावद्ययोगं, व्यवसृजामीति वा, अवशब्दोऽधःशब्दस्यार्थे विशेषेणाधः सृजामीत्यर्थः, नन्वेवं सावद्ययोगपरित्यागात् करोमि भदन्त ! सामायिकमिति सावद्ययोगनिवृत्तिरुच्यते, तस्य व्यवसृजामि शब्दप्रयोगे वैपरीत्यमापद्यते, तन्न, यस्मात् मांसादिविरमणक्रियानन्तरं व्यवसृजामीति प्रयुक्ते तद्विपक्षत्यागो मांसभक्षण-निवृत्तिरभिधीयते, एवं सामायिकानन्तरमपि प्रयुक्ते व्यवसृजामिशब्दे तद्विपक्षत्यागोऽवगम्यते, स च तद्विपक्षः सुगम एवेत्यत्र बहु वक्तव्यं तत्तु नोच्यते, ग्रन्थविस्तरभयाद्, गमनिकामात्रप्रधानत्वात् प्रारम्भस्य ॥

साम्प्रतं व्युत्सर्गप्रतिपादनायाऽऽह ग्रन्थकारः–

અતીત સાવદ્યયોગને અટકાવું છું. હવે 'व्युत्सृजामि' શબ્દનો અર્થ કરે છે - વિ શબ્દ વિવિધ અર્થમાં કે વિશેષ અર્થમાં છે. ઉત્ શબ્દ અત્યંત અર્થમાં છે. સૃજામિ એટલે હું ત્યાગ કરું છું. સંપૂર્ણ અર્થ – વિવિધ એવા સાવદ્ય- યોગોનો અથવા સામાન્યથી નહિ પણ વિશેષથી સાવદ્યયોગોનો અત્યંત = ખૂબ સારી રીતે હું ત્યાગ કરું છું. અથવા વ્યવસૃજામિ શબ્દ સમજવો. અહીં અવ શબ્દ अधः શબ્દના અર્થમાં જાણવો. તેથી વિશેષ કરીને નીચેથી (દૂરથી) ત્યાગ કરું છું.

શંકા : આ રીતે તો करेमि भंते ! सामाइयं.... ઈત્યાદિ સૂત્રનો આ તાત્પર્યાર્થ થયો કે સાવદ્યયોગના પરિત્યાગવડે હે ભદન્ત ! હું સામાયિકને કરું છું. આના દ્વારા સાવદ્યયોગની નિવૃત્તિ કહી. હવે अंते तस्स भंते ! पडिक्कमामि.... ઈત્યાદિ સૂત્રમાં तस्य व्युत्सृजामि એ પ્રમાણે શબ્દપ્રયોગ કરવામાં, तस्स એટલે પૂર્વે જે સાવદ્યયોગનો ત્યાગ કર્યો તે સાવદ્યયોગના ત્યાગનો હું ત્યાગ કરું છું. આ રીતનો અર્થ નીકળશે અર્થાત્ સાવદ્યયોગની નિવૃત્તિને હું છોડું છું, અર્થાત્ સાવદ્યયોગને હું સેવું છું. આ રીતે વિપરીત અર્થ પ્રાપ્ત થાય છે.

સમાધાન : આ રીતે વિપરીત અર્થ પ્રાપ્ત થાય નહિ, કારણ કે જેમ मंसं पच्चक्खामि अन्नत्थणाभोगेणं.... ઈત્યાદિવડે માંસવિરતિને કર્યા પછી છેલ્લે वोसिरामि શબ્દ બોલે ત્યારે માંસની વિરતિના વિપક્ષને (=માંસભક્ષણને) જ વોસિરાવે છે, અર્થાત્ માંસભક્ષણની નિવૃત્તિ જ કરે છે. એ પ્રમાણે સામાયિક કર્યા પછી એટલે કે સાવદ્યયોગની વિરતિ કર્યા પછી वोसिरामि શબ્દ બોલે ત્યારે સાવદ્યયોગની વિરતિના વિપક્ષનો (=સાવદ્ય યોગની પ્રવૃત્તિનો) ત્યાગ જ જણાય છે. (કારણ કે તેને વોસિરાવું છું અર્થાત્ સાવદ્યયોગની વિરતિના વિપક્ષને વોસિરાવું છું આવો અર્થ પ્રાપ્ત થાય. તે સાવદ્યયોગની વિરતિનો વિપક્ષ કોણ છે ? તે વિપક્ષ તરીકે સાવદ્યયોગની પ્રવૃત્તિ છે. તેને હું વોસિરાવું છું, અર્થાત્ તેનો હું ત્યાગ કરું છું.) અને આ ત્યાગ સાવદ્યયોગની પ્રવૃત્તિનો વિપક્ષ છે એવું સુખેથી જાણી શકાય જ છે. આ વિષયમાં ઘણું બધું કહેવા યોગ્ય છે, છતાં તે ગ્રંથવિસ્તાર થવાના ભયથી કહેવાતું નથી, કારણ કે ગ્રંથનો પ્રારંભ વ્યાખ્યા માત્રને નજરમાં રાખીને જ કરવામાં આવ્યો હોવાથી અહીં તે તે પદાર્થોની વ્યાખ્યા કરવી એ જ મુખ્ય છે.

અવતરણિકા : હવે ગ્રંથકારશ્રી વ્યુત્સર્ગનું પ્રતિપાદન કરવા માટે કહે છે ⇨

दव्वविउस्सग्गे खलु पसन्नचंदो हवे उदाहरणं ।
पडिआगयसंवेगो भावंमिवि होइ सो चेव ॥१०५१॥

व्याख्या : इह द्रव्यव्युत्सर्गः—गणोपधिशरीरान्नपानादिव्युत्सर्गः, अथवा द्रव्यव्युत्सर्गः आर्तध्यानादिध्यायिनः कायोत्सर्ग इति, अत एवाऽऽह—द्रव्यव्युत्सर्गे खलु प्रसन्नचन्द्रो भवत्युदाहरणं, भावव्युत्सर्गस्त्वज्ञानादिपरित्यागः, अथवा धर्मशुक्लध्यायिनः कायोत्सर्ग एव, तथा चाऽऽह— प्रत्यागतसंवेगो 'भावेऽपि' भावव्युत्सर्गेऽपि भवति स एव—प्रसन्नचन्द्र उदाहरण-मिति गाथाक्षरार्थः ॥१०५१॥ भावार्थः कथानकादवसेयः, तच्चेदम्—खिँइपइट्ठिए णयरे पसन्नचंदो राया, तत्थ भगवं महावीरो समोसढो, तओ राया धम्मं सोऊण संजायसंवेगो पव्वइओ, गीयत्थो जाओ । अण्णया जिणकप्पं पडिवज्जिउकामो सत्तभावणाए अप्पाणं भावेइ, तेणं कालेणं रायगिहे णयरे मसाणे पडिमं पडिवन्नो, भगवं च महावीरो तत्थेव समोसढो, लोगोऽवि वंदगो णीइ, दुवे य वाणियगा खिइपइट्ठियाओ तत्थेव आयाया, पसन्नचंदं पासिऊण एगेण भणियं—एस अम्हाणं सामी रायलच्छिं परिच्चइय तवसिरिं पडिवन्नो, अहो से धन्नया,

ગાથાર્થ : દ્રવ્યત્યાગમાં પ્રસન્નચંદ્રનું દૃષ્ટાન્ત છે. ભાવને વિશે પાછા સંવેગભાવને પામેલા પ્રસન્નચંદ્રનું જ દૃષ્ટાન્ત જાણવું.

ટીકાર્થ : અહીં ગણ, ઉપધિ, શરીર, અન્નપાનાદિનો ત્યાગ એ દ્રવ્યત્યાગ જાણવો. અથવા આર્તધ્યાનાદિ કરનારનો કાયોત્સર્ગ ('તાવ કાયં ઠાણેણં મોણેણં ઝાણેણં અપ્પાણં વોસિરામિ' આ રીતનો કાયાનો ત્યાગ) એ દ્રવ્યવ્યુત્સર્ગ જાણવો. આથી જ મૂળમાં કહ્યું છે —દ્રવ્યવ્યુત્સર્ગમાં પ્રસન્નચંદ્ર ઉદાહરણ છે. તથા અજ્ઞાનાદિનો પરિત્યાગ એ ભાવનો વ્યુત્સર્ગ કહેવાય છે. અથવા ધર્મ-શુક્લધ્યાન ધરનારનો કાયોત્સર્ગ જ ભાવવ્યુત્સર્ગ છે. તેથી જ કહ્યું છે — ભાવવ્યુત્સર્ગમાં પણ પુનઃ સંવેગને પામેલ પ્રસન્નચંદ્ર જ ઉદાહરણ છે. **॥૧૦૫૧॥** ભાવાર્થ કથાનકથી જાણવો.

❋ પ્રસન્નચંદ્રરાજર્ષિનું દૃષ્ટાન્ત ❋

ક્ષિતિપ્રતિષ્ઠિત નગરમાં પ્રસન્નચંદ્ર રાજા હતો. ત્યાં ભગવાન મહાવીર પધાર્યા. તેમની પાસેથી ધર્મ સાંભળીને ઉત્પન્ન થયેલા સંવેગવાળા રાજાએ દીક્ષા લીધી. ગીતાર્થ થયો. એકવાર જિનકલ્પને સ્વીકારવાની ઇચ્છાથી સત્વની ભાવનાવડે પોતાને ભાવિત કરે છે. તે કાળે રાજગૃહ નગરના સ્મશાનમાં પ્રતિમાને સ્વીકારીને તે રહ્યો. ભગવાન મહાવીર ત્યાં જ પધાર્યા. લોકો પણ તેમને વંદન કરવા જાય છે. ક્ષિતિપ્રતિષ્ઠિત નગરમાંથી બે વેપારીઓ ત્યાં જ આવેલા હતા. પ્રસન્નચંદ્રને જોઈને એકે કહ્યું — "અરે ! આ આપણો સ્વામી રાજલક્ષ્મીને છોડીને તપલક્ષ્મીને પામ્યો છે.

૪૦. क्षितिप्रतिष्ठिते नगरे प्रसन्नचन्द्रो राजा, तत्र भगवान् महावीरः समवसृतः, ततो राजा धर्मं श्रुत्वा संजातसंवेगः प्रव्रजितः, गीतार्थो जातः । अन्यदा जिनकल्पं प्रतिपत्तुकामः सत्त्वभावनयाऽऽत्मानं भावयति, तस्मिन् काले राजगृहे नगरे श्मशाने प्रतिमां प्रतिपन्नः, भगवांश्च महावीरस्तत्रैव समवसृतः, लोकोऽपि वन्दको निर्गच्छति, द्वौ च वणिजौ क्षितिप्रतिष्ठितात् तत्रैवागतौ, प्रसन्नचन्द्रं दृष्ट्वा एकेन भणितं—एषोऽस्माकं स्वामी राज्यलक्ष्मीं परित्यज्य तपःश्रियं प्रतिपन्नः, अहो अस्य धन्यता,

[૪૧]**बितिएण भणियं–कुओ एयस्स धण्णया ?, जो असंजायबलं पुत्तं रज्जे ठविऊण पव्वइओ, सो तवस्सी दाइगेहिं परिभविज्जइ, णयरं च उत्तिमक्खयं पवण्णं ताव, एवमणेण बहुओ लोगो दुक्खे ठविओत्ति अदट्ठव्वो एसो, तस्स तं सोऊण कोवो जाओ, चिंतियं चऽणेण–को मम पुत्तस्स अवकरेइत्ति ?, नूणममुगो, ता किं तेण ?, एयावत्थगओ णं वावाएमि, माणससंगामेण रोद्दज्झाणं पवन्नो, हत्थिणा हत्थिं वावाएइत्ति, विभासा । एत्थंतरे सेणिओ भगवं वंदओ णीइ, तेणवि दिट्ठो वंदिओ य, अणेण ईसिंपि न य निज्झाइंतओ, सेणिएण चिंतियं–सुक्कज्झाणोवगओ एस भगवं, ता एरिसंमि झाणे कालगयस्स का गइ भवइत्ति भगवंतं पुच्छिस्सं, तओ गओ वंदिऊण पुच्छिओ-ऽणेण भगवं–जंमि झाणे ठिओ मए वंदिओ पसन्नचंदो तंमि मयस्स कहिं ऊववाओ भवइ ?,**

અહો ! આની ધન્યતા.'' બીજાએ કહ્યું – 'અરે ! આની ધન્યતા વળી ક્યાંથી હોય ? કે જેણે નહિ ઉત્પન્ન થયેલા બળવાળા (એટલે કે બાળકપણામાં રહેલા) પુત્રને રાજ્ય સોંપી દીક્ષા લીધી. બીચારો તે તપસ્વી (રાજ્યની ધુરા સંભાળી શકે એવું બળ ન હોવાથી તપસ્વી) નજીકના સંબંધવાળા ગોત્રજ બંધુઓવડે હેરાન થઈ રહ્યો છે. આવું ઉત્તમ નગર ક્ષયને પામ્યું. આ પ્રમાણે આ સાધુડાએ ઘણા લોકોને દુઃખી કર્યા છે માટે આનું મોં પણ જોવા લાયક નથી.' આના આવા વચનો સાંભળીને પ્રસન્નચંદ્રરાજર્ષિને કોપ ચઢ્યો. એણે વિચાર્યું - 'કોણ છે ? જે મારા પુત્ર ઉપર અપકાર કરે છે ? મનમાં જ જવાબ મળ્યો –'અમુક. એની શું મજાલ ? આ અવસ્થામાં રહેલો હું તેને મારી નાંખું.' આ પ્રમાણે મનમાં ને મનમાં તે યુદ્ધ કરવા લાગ્યો. રૌદ્રધ્યાનને પામ્યો. તે યુદ્ધમાં હાથીવડે શત્રુહાથીને મારે છે વિગેરે યુદ્ધનું વર્ણન સમજી લેવું.

એ સમયે જ શ્રેણિક ભગવાનને વંદના કરવા નીકળ્યો છે. તેણે પણ પ્રસન્નચંદ્રને જોયો અને વંદન કર્યા. ઋષિ થોડોક પણ ધ્યાનથી ચલિત ન થયો. તેથી શ્રેણિકે વિચાર્યું કે 'આ ભગવાન શુક્લધ્યાનને પામ્યા છે, તેથી આ પ્રકારના ધ્યાનમાં કાળ પામેલાની કઈ ગતિ થાય ? એ હું ભગવાનને પુછીશ.' ત્યાંથી તે ભગવાન પાસે ગયો. વંદીને શ્રેણિકે ભગવાનને પૂછ્યું – 'જે ધ્યાનમાં રહેલા પ્રસન્નચંદ્રને મેં વંદન કર્યા તે ધ્યાનમાં જ મૃત્યુ પામેલાની ક્યાં ઉત્પત્તિ થાય ?' ભગવાને કહ્યું – 'અધોલોકની સાતમી નરકમાં ઉપપાત થાય.' શ્રેણિકે વિચાર્યું 'હા ! શા માટે આવું ? ફરીથી ભગવાનને પુછીશ.' એ દરમિયાન માનસસંગ્રામમાં પ્રધાનનાયક સાથે યુદ્ધ રમતા રમતા

૪૧. द्वितीयेन भणितं–कुत एतस्य धन्यता ?, योऽसंजातबलं पुत्रे राज्ये स्थापयित्वा प्रव्रजितः, स तपस्वी दायादैः परिभूयते, नगरं चोत्तमं क्षयं प्रपन्नं तावत्, एवमनेन बहुको लोको दुःखे स्थापित इत्यद्रष्टव्य एषः, तस्य तत् श्रुत्वा कोपो जातः, चिन्तितं चानेन–को मम पुत्रमपकरोतीति ?, नूनममुकः, तत् किं तेन ?, एतदवस्थागतो (ऽपि)तं व्यापादयामि, मानससंग्रामेण रौद्रं ध्यानं प्रपन्नः, हस्तिना हस्तिनं व्यापादयतीति विभाषा । अत्रान्तरे श्रेणिको भगवन्तं वन्दितुं निर्गच्छति, तेनापि दृष्टो वन्दितश्च, अनेनेषदपि न च निर्ध्यातः, श्रेणिकेन चिन्तितं–शुक्लध्यानोपगत एष भगवान्, तदीदृशे ध्याने कालगतस्य का गतिर्भवतीति भगवन्तं प्रक्ष्यामि, ततो गतो वन्दित्वा पृष्टोऽनेन भगवान्–यस्मिन् ध्याने स्थितो मया वन्दितः प्रसन्नचन्द्रस्तस्मिन्मृतस्य क्वोपपातो भवति ?,

[૪૨]ભગવયા ભણિયં–અહે સત્તમાए પુઢવીए, તઓ સેણિએણ ચિંતિયં–હા ! કિમેયંતિ ?, પુણો પુચ્છિસ્સં । એત્થંતરંમિ અ પસન્નચંદસ્સ માણસે સંગામે પહાણનાયગેણ સહાવડિયસ્સ અસિસત્તિ-ચક્કકપ્પણિપ્પમુહાइं खयं गयाइं पहरणाइं, तઓऽणેણ સિરત્તાણેણં વાવાएમિત્તિ પરામુસિયમુત્તિમંગં, જાહે લોયં કયંતિ, તઓ સંવેગમાવણ્ણો મહયા વિસુજ્ઝમાણપરિણામેણ અત્તાણં નિંદિડું પયત્તો, સમાહિયં ચણેણ પુણરવિ સુક્કं ઝાણં । એત્થંતરંમિ સેણિએણવિ પુણોऽવિ ભગવં પુચ્છિઓ–ભગવં ! જારિસે ઝાણે સંપइ પસન્નચંદો વટ્ટइ તારિસે મયસ્સ કહિં ઉવવાઓ ?, ભગવયા ભણિયં–અણુત્તરસુરેસુંતિ, તઓ સેણિએણ ભણિયં–પુવ્વં કિમન્નહા પરૂવિયં ઉઆહુ મયા અન્નહા અવગચ્છિયંતિ ?, ભગવયા ભણિયં–ન અન્નહા પરૂવિયં, સેણિએણ ભણિયં–કિં વા કહં વત્તિ ?, તઓ ભગવયા સવ્વો વુત્તંતો સાહિઓ । એત્થંતરંમિ ય પસન્નચંદસમીવે દિવ્વો દેવદુંદુહિસણાહો મહન્તો કલયલો ઉદ્ધાइઓ, તઓ સેણિએણ ભણિયં–ભગવં ! કિમેયંતિ ?, ભગવયા ભણિયં–તસ્સેવ વિસુજ્ઝમાણપરિણામસ્સ

તલવાર, શક્તિચક્ર, કલ્પની (આ બધા તે તે શસ્ત્રોના નામો છે.) વિગેરે શસ્ત્રો પૂરા થયા. તેથી પ્રસન્નચંદ્રે મુગટવડે હું આને મારી નાંખું એમ વિચારી પોતાના મસ્તકે સ્પર્શ કર્યો, ત્યારે લોચ કરેલો છે એમ જાણી સંવેગને પામેલો ઘણા વિશુદ્ધમાન પરિણામોવડે પોતાને નિંદવા લાગ્યો અને ફરી શુક્લધ્યાન પ્રાપ્ત કર્યું. એ જ સમયે આ બાજુ શ્રેણિકે પણ ભગવાનને પૂછ્યું કે - "ભગવન્ ! અત્યારે જે ધ્યાનમાં પ્રસન્નચંદ્ર વર્તે છે, તે ધ્યાનમાં મરે તો તેનો ક્યાં ઉપપાત થાય ?"

ભગવાને કહ્યું – "અનુત્તરદેવલોકમાં". શ્રેણિકે પૂછ્યું – "તો ભગવન્ ! પૂર્વે આપે શું જુદી વાત કરી હતી? અથવા શું મેં ખોટો બોધ કર્યો હતો ?" ભગવાને કહ્યું – "મેં પૂર્વે જુદી વાત કરી નહોતી." શ્રેણિકે પૂછ્યું – "તો આ કેવી રીતે ઘટે ? (અર્થાત્ ક્ષણ પહેલા સાતમી નરક અને ક્ષણવાર પછી અનુત્તરદેવલોક, આ કેવી રીતે ઘટે ?)" ત્યારે ભગવાને આખો પ્રસંગ કહી બતાવ્યો. એવામાં પ્રસન્નચંદ્રરાજર્ષિની બાજુમાં કલકલ એ પ્રમાણે મોટો દિવ્ય દેવદુંદુભિનો અવાજ થવા લાગ્યો. ત્યારે શ્રેણિકે પૂછ્યું– "ભગવન્ ! આ શું છે ?" ભગવાને કહ્યું – "વિશુદ્ધમાન

---

૪૨. भगवता भणितं–अधः सप्तम्यां पृथिव्यां, ततः श्रेणिकेन चिन्तितं–हा किमेतदिति ?, पुनः प्रक्ष्यामि । अत्रान्तरे च प्रसन्नचन्द्रस्य मानसे संग्रामे प्रधाननायकेन सहापतितस्यासिशक्तिचक्रकल्पनीप्रमुखानि क्षयं गतानि प्रहरणानि, ततोऽनेन शिरस्त्राणेन व्यापादयामीति परामृष्टमुत्तमाङ्गं, यदा लोचः कृत इति, ततः संवेगमापन्नः महता विशुध्यमानपरिणामेनात्मानं निन्दितुं प्रवृत्तः, समाहितं चानेन पुनरपि शुक्लं ध्यानं । अत्रान्तरे श्रेणिकेनापि पुनरपि भगवान् पृष्टः–भगवन् ! यादृशे ध्याने सम्प्रति प्रसन्नचन्द्रो वर्त्तते तादृशे मृतस्य क्वोपपातः ?, भगवता भणितं–अनुत्तरसुरेष्विति, ततः श्रेणिकेन भणितं–पूर्वं किमन्यथा प्ररूपितमुताहो मयाऽन्यथाऽवगतमिति ?, भगवता भणितं–नान्यथा प्ररूपितं, श्रेणिकेन भणितं–किं वा कथं वेति ?, ततो भगवता सर्वो वृत्तान्तः कथितः । अत्रान्तरे च प्रसन्नचन्द्रसमीपे दिव्यो देवदुन्दुभिसनाथो महान् कलकल उत्थितः, ततः श्रेणिकेन भणितं–भगवन् ! किमेतदिति ?, भगवता भणितं–तस्यैव विशुध्यमानपरिणामस्य

કેવલણાણં[૪૩] સમુપ્પણ્ણં, તઓ સે દેવા મહિમં કરેંતિ । એસ એવ દવ્વવિઉસ્સગ્ગભાવવિઉસ્સગ્ગેસુ ઉદાહરણં ॥

साम्प्रतं समाप्तौ यथाभूतोऽस्य कर्ता भवति सामायिकस्य तथाभूतं संक्षेपतोऽभिधित्सुराह—

सावज्जजोगविरओ तिविहं तिविहेण वोसिरिअ पावं ।
सामाइअमाईए एसोऽणुगमो परिसमत्तो ॥१०५२॥

व्याख्या : सावद्ययोगविरतः, कथमित्याह–त्रिविधं त्रिविधेन व्युत्सृज्य पापं न तु सापेक्ष एवेत्यर्थः, पाठान्तरं वा सावद्ययोगविरतः सन् त्रिविधं त्रिविधेन व्युत्सृजति पापमेष्यं, 'सामायिकादौ'सामायिकारम्भसमये एषोऽनुगमः परिसमाप्तः, अथवा सामायिकादौ सूत्र इति, आदिशब्दात् सर्वमित्याद्यवयवपरिग्रह इति गाथार्थः ॥१०५२॥ उक्तोऽनुगमः, सम्प्रति नयाः, ते च

પરિણામવાળા તેને કેવલજ્ઞાન ઉત્પન્ન થયું છે. તેથી દેવો તેનો મહિમા કરે છે.'' આ જ ઉદાહરણ દ્રવ્યવ્યુત્સર્ગ અને ભાવવ્યુત્સર્ગમાં જાણવું.

અવતરણિકા : હવે અંતમાં આ સામાયિકનો કર્તા જેવા પ્રકારનો થાય છે, તેવા પ્રકારના તે કર્તાને સંક્ષેપમાં કહેવાની ઈચ્છાવાળા ગ્રંથકારશ્રી કહે છે ⇨

ગાથાર્થ : ટીકાર્થ પ્રમાણે જાણવો.

ટીકાર્થ : સામાયિકના આરંભ સમયે સાવદ્યયોગોથી વિરત થાય છે. કેવી રીતે વિરત થાય છે ? તે કહે છે – ત્રિવિધં ત્રિવિધેન પાપનો ત્યાગ કરીને વિરત થાય છે, નહિ કે સાપેક્ષ એવો તે વિરત થાય છે. (આશય એ છે કે વ્યવહારથી પાપનો ત્યાગ કર્યો હોય પણ નિશ્ચયથી ત્યાગ કર્યો ન હોય (મનમાં અપેક્ષા પડી હોય) તેવો સામાયિકકર્તા સાવદ્યયોગથી વિરત થતો નથી, પરંતુ જેણે ત્રિવિધં ત્રિવિધેન અર્થાત્ મન-વચન-કાયા ત્રણેથી ત્રણે પ્રકારના યોગોનો ત્યાગ કર્યો છે તે જીવ સાવદ્યયોગોથી વિરત થયો છે, અથવા પાઠાન્તર જાણવો કે સામાયિકના આરંભ સમયે સાવદ્યયોગથી વિરત થયેલો જીવ ત્રિવિધ-ત્રિવિધે ભવિષ્યના પાપોનો ત્યાગ કરે છે.

'ભવિષ્યના પાપો' આવું કહેવા પાછળ ટીકાકારનો (H) આશય એવો છે કે–'સાવદ્યયોગવિરત' આ વિશેષણ દ્વારા જ સમજાઈ જવા છતાં ફરી 'ત્રિવિધ–ત્રિવિધવડે પાપોનો ત્યાગ કરું છું.' એવું ગ્રહણ કરેલ વાક્ય એમ જણાવે છે કે જે સાવદ્યયોગમાં મારી પ્રવૃત્તિ હતી, તે સાવદ્યયોગથી હું પાછો ફરું છું. તેથી 'સાવદ્યયોગવિરત' વિશેષણથી જણાય છે કે– ભવિષ્યના જે પાપો છે તે હજુ ત્યાગવાના બાકી છે, તેથી તે ભવિષ્યના પાપોનો ત્યાગ જણાવવા માટે 'ભવિષ્યના પાપો' વિશેષણ મુક્યું છે.) આ પ્રમાણે અનુગમનામનું ત્રીજું અનુયોગદ્વાર પૂર્ણ થયું. અથવા 'सामायिकादौ सूत्रे' એ અર્થ લઈએ તો આ પ્રમાણે અર્થ કરવો કે– (H) સામાયિક વિગેરે સૂત્રને વિશે એટલે કે સામાયિકાદિસૂત્રવિષયક આ અનુગમ સમાપ્ત થયો. (અહીં આદિશબ્દથી સૂત્રના જ 'सव्वं सावज्जं जोगं'.... વિગેરે અવયવો લેવાના છે, અર્થાત્ સંપૂર્ણ એવો સામાયિકસૂત્રવિષયક આ અનુગમ પૂર્ણ થયો.) ॥૧૦૫૨॥ અનુગમ કહ્યો.

૪૩. केवलज्ञानं समुत्पन्नं, ततस्तस्य देवा महिमानं कुर्वन्ति । एष एव द्रव्यव्युत्सर्गभावव्युत्सर्गयोरुदाहरणं ।

नैगमसङ्ग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवम्भूतभेदभिन्नाःखल्वोघतः सप्त भवन्ति, स्वरूपं चैतेषामधः सामायिकाध्ययने न्यक्षेण प्रदर्शितमेवेति नेह प्रतन्यते, इह पुनः स्थानाशून्यार्थमेते ज्ञानक्रियानयद्वयान्तर्भावद्वारेण समासतः प्रोच्यन्ते, ज्ञाननयः क्रियानयश्च, तथा चाऽऽह—

विज्जाचरणनएसुं सेससमोआरणं तु कायव्वं ।
सामाइअनिज्जुत्ती सुभासिअत्था परिसमत्ता ॥१०५३॥

व्याख्या : 'विज्जाचरणनएसुं'ति विद्याचरणनययोः ज्ञानक्रियानययोरित्यर्थः, 'सेससमोयारणं तु कायव्वं'ति शेषनयसमवतारः कर्तव्यः, तुशब्दो विशेषणार्थः, किं विशिनष्टि ?—तौ च वक्तव्यौ, सामायिकनिर्युक्तिः सुभाषितार्था परिसमाप्तेति प्रकटार्थमिति गाथार्थः ॥१०५३॥

साम्प्रतं स्वद्वार एव शेषनयान्तर्भावेनाधिकृतमहिमानौ अनन्तरोपन्यस्तगाथागततुशब्देन चावश्यवक्तव्यतया विहितौ ज्ञानचरणनयावुच्येते, तत्र ज्ञाननयदर्शनमिदं—ज्ञानमेव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणं, युक्तियुक्तत्वात्, तथा चाऽऽह—

नायंमि गिण्हिअव्वे अगिण्हिअव्वंमि चेव अत्थंमि ।
जइअव्वमेव इअ जो उवएसो सो नओ नामं ॥१०५४॥

હવે નયોની વિચારણા કરવાની છે. તેમાં તે નયો નૈગમ, સંગ્રહ, વ્યવહાર, ઋજુસૂત્ર, શબ્દ, સમભિરુઢ અને એવંભૂત આ પ્રમાણે સામાન્યથી સાત છે. દરેક નયનું સ્વરૂપ પૂર્વે સામાયિક અધ્યયનમાં વિસ્તારથી બતાવી જ દીધું હોવાથી અહીં બતાવાતું નથી. છતાં પણ અહીં સ્થાન શૂન્ય ન રહે તે માટે આ સાતે નયો જ્ઞાનનય અને ક્રિયાનયમાં સમાવેશ કરવા દ્વારા સંક્ષેપથી કહેવાય છે. બે નયો છે જ્ઞાનનય અને ક્રિયાનય. તે જ કહે છે ⇨

ગાથાર્થ : વિદ્યા અને ચારિત્રનયોમાં શેષ નયોનો સમાવેશ કરવા યોગ્ય છે. સારી રીતે કહેવાયેલા છે અર્થો જેમાં એવી સામાયિકનિર્યુક્તિ સમાપ્ત થઈ.

ટીકાર્થ : વિદ્યાનય = જ્ઞાનનય અને ચારિત્રનય = ક્રિયાનયમાં શેષ નયોનો સમાવેશ કરવા યોગ્ય છે. અહીં 'તુ' શબ્દ વિશેષ અર્થને જણાવનારો છે. ક્યાં વિશેષ અર્થને જણાવે છે ? તે કહે છે — આ બંને નયો કહેવા યોગ્ય છે. સુભાષિત—અર્થોવાળી સામાયિકનિર્યુક્તિ પરિસમાપ્ત થઈ. આ વાક્યનો અર્થ પ્રગટ=સ્પષ્ટ જ છે. **॥૧૦૫૩॥**

અવતરણિકા : હવે પોતાના દ્વારમાં જ (અર્થાત્ જ્ઞાન-ક્રિયાના પોત પોતાના દ્વારમાં જ) શેષનયોનો સમાવેશ કરવા દ્વારા પ્રગટ કરાયેલો છે મહિમા જેઓનો (અર્થાત્ શેષ નયોનો સમાવેશ કરવા દ્વારા વધારવામાં આવ્યું છે મહત્ત્વ જે બે નયોનું એવા આ બે નયો) અને હમણાં જ બતાવેલી ગાથામાં રહેલ 'તુ' શબ્દવડે અવશ્ય કહેવા યોગ્ય તરીકે સ્થાપિત કરાયેલા એવા જ્ઞાન અને ક્રિયા નય કહેવાય છે. તેમાં જ્ઞાનનયની માન્યતા આ પ્રમાણે છે →જ્ઞાન જ યુક્તિ-યુક્ત હોવાથી આ લોક અને પરલોકમાં ફળની પ્રાપ્તિ માટેનું પ્રધાન કારણ છે. કહ્યું છે ⇨

ગાથાર્થ : ઉપાદેય અને અનુપાદેય એવા પદાર્થો જણાયા પછી (મોક્ષ માટે) પ્રયત્ન જ કરવા યોગ્ય છે. આ પ્રમાણેનો જે ઉપદેશ છે તે નય છે.

વ્યાખ્યા—'नायंमि'त्ति ज्ञाते सम्यक्परिच्छिन्ने 'गिण्हियव्वे'त्ति ग्रहीतव्ये उपादेये 'अगिण्हियव्वंमि'त्ति अग्रहीतव्ये अनुपादेये हेय इत्यर्थः, चशब्दः खलूभयोर्ग्रहीतव्याग्रहीतव्ययोर्ज्ञातत्वानुकर्षणार्थः उपेक्षणीयसमुच्चयार्थो वा, एवकारस्त्ववधारणार्थः, तस्य चैवं व्यवहितः प्रयोगो द्रष्टव्यः—ज्ञात एव ग्रहीतव्ये तथाऽग्रहीतव्ये तथोपेक्षणीये च ज्ञात एव नाज्ञाते 'अत्थंमि'त्ति अर्थ ऐहिकामुष्मिके, तत्रैहिकः ग्रहीतव्यः स्त्रक्चन्दनाङ्गनादिः अग्रहीतव्यो विषशस्त्रकण्टकादिरुपेक्षणीयस्तृणादिः, आमुष्मिको ग्रहीतव्यः सम्यग्दर्शनादिरग्रहीतव्यो मिथ्यात्वादिरुपेक्षणीयो विवक्षयाऽभ्युदयादिरिति, तस्मिन्नर्थे 'जइअव्वमेव'त्ति अनुस्वारलोपाद् यतितव्यम् 'एवम्' अनेन क्रमेणैहिकामुष्मिकफलप्राप्त्यर्थिना सत्त्वेन यतितव्यमेव, प्रवृत्त्यादिलक्षणः प्रयत्नः कार्य इत्यर्थः, इत्थं चैतदङ्गीकर्तव्यं, सम्यगज्ञाते प्रवर्तमानस्य फलविसंवाददर्शनात्, तथा चान्यैरप्युक्तम्—

"विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता ।
मिथ्याज्ञानात् प्रवृत्तस्य, फलासंवाददर्शनात् ॥१॥"

❋ જ્ઞાનનય ❋

ટીકાર્થ : ઉપાદેય અને અનુપાદેય એવા અર્થો જણાયા પછી, મૂળમાં 'અગ્રહીતવ્ય' શબ્દ પછી જે 'ચ' શબ્દ છે તે ઉપાદેય અને હેય બંને જ્ઞાત હોવા જોઈએ એવું જણાવનારો છે. (અર્થાત્ કોઈ 'જ્ઞાત' શબ્દને માત્ર ગ્રહીતવ્યશબ્દ સાથે જ જોડી ન દે તે માટે ખુલાસો કર્યો કે 'ચ' શબ્દ ગ્રહીતવ્ય અને અગ્રહીતવ્ય બંને પદાર્થો જ્ઞાત હોવા જોઈએ એવું જણાવનારો છે.) અથવા નહિ કહેવાયેલ એવા ઉપેક્ષણીય પદાર્થો પણ અહીં જાણી લેવાના છે તે જણાવનારો આ ચ શબ્દ જાણવો. મૂળમાં 'च' શબ્દ પછી જે 'एव' કાર છે તે 'જ' કાર અર્થમાં છે. તેનો આ પ્રમાણે અન્ય સ્થાને સંબંધ જોડવાનો છે. ઉપાદેય, હેય અને ઉપેક્ષણીય એવા પદાર્થો જણાયા પછી જ મોક્ષાર્થે પ્રયત્ન કરવો, પરંતુ જાણ્યા વિના પ્રયત્ન કરવો નહિ. અહીં ઐહિક અને આમુષ્મિક એમ બે પ્રકારે અર્થો છે. તેમાં ઐહિક (ઈહલોક સંબંધી) ઉપાદેય તરીકે માળા, ચંદન, સ્ત્રી વગેરે, તથા હેય તરીકે વિષ, શસ્ત્ર, કાંટા વગેરે અને ઉપેક્ષણીય તરીકે તણખલા વિગેરે જાણવા.

આમુષ્મિક (પરલોક સંબંધી) ઉપાદેય તરીકે સમ્યગ્દર્શનાદિ, હેય તરીકે મિથ્યાત્વાદિ અને ઉપેક્ષણીય તરીકે અમુક વિવક્ષાએ અભ્યુદયાદિ (અભ્યુદય = પરલોકમાં દેવગતિ વિગેરેની પ્રાપ્તિ) આવા પ્રકારનાં અર્થોમાં, 'यतितव्यमेव' અહીં અનુસ્વારનો લોપ થયેલો હોવાથી 'यतितव्यमेवं' આ પ્રમાણે 'एव' ની બદલે एवं શબ્દ જોડવો, અર્થાત્ ઉપરોક્ત ક્રમ પ્રમાણે (એટલે કે ઉપાદેયાદિનું જ્ઞાન કર્યા પછી જ) ઐહિક-આમુષ્મિક ફળના અર્થી એવા જીવવડે (ઉપરોક્ત ઉપાદેયાદિ અર્થોમાં) પ્રવૃત્તિ વિગેરે રૂપ યત્ન કરવા યોગ્ય છે.

આ વાત એ પ્રમાણે જ સ્વીકારવા યોગ્ય છે, કારણ કે સમ્યગ્ રીતે તે તે વસ્તુનો બોધ પામ્યા વિના તે તે વસ્તુમાં પ્રવૃત્તિ કરનારને વિપરીત ફળ પ્રાપ્ત થતું દેખાય છે. તથા અન્યોવડે પણ કહેવાયેલું છે કે — 'પુરુષોને જ્ઞાન જ ફળ આપનારું છે. જ્ઞાન રહિતની ક્રિયા ફળ આપનારી

तथाऽऽमुष्मिकफलप्राप्त्यर्थिनाऽपि ज्ञात एव यतितव्यं, तथा चागमोऽप्येवमेव व्यवस्थितः, यत उक्तम् –

"[४४]पढमं णाणं तओ दया, एवं चिट्ठइ सव्वसंजए ।
अन्नाणी किं काहिति किं वा णाहिति छेय पावगं ? ॥१॥"

इतश्चैतदेवमङ्गीकर्तव्यं यस्मात्तीर्थकरगणधरैरगीतार्थानां केवलानां विहारक्रियाऽपि निषिद्धा, तथा चागमः –

"[४५]गीयत्थो य विहारो बितिओ गीयत्थमीसओ भणिओ ।
एत्तो तइयविहारो णाणु-ण्णाओ जिणवरेहिं ॥१॥"

न यस्मादन्धेनान्धः समाकृष्यमाणः सम्यक्पन्थानं प्रतिपद्यत इत्यभिप्रायः । एवं तावत् क्षायोपशमिकं ज्ञानमधिकृत्योक्तं, क्षायिकमप्यङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव विज्ञेयं, यस्मादर्हतोऽपि भवाम्भोधितटस्थस्य दीक्षां प्रतिपन्नस्योत्कृष्टतपश्चरणवतोऽपि न तावदपवर्गप्राप्तिः संजायते यावज्जीवाजीवाद्यखिलवस्तुपरिच्छेदरूपं केवलज्ञानं नोत्पन्नमिति, तस्माज्ज्ञानमेव

મનાઈ નથી, કારણ કે મિથ્યાજ્ઞાનથી (અજ્ઞાનથી) પ્રવૃત્ત થયેલાને વિપરીત ફળ પ્રાપ્ત થતું દેખાય છે. ॥૧॥" તથા આમુષ્મિક ફળના અર્થી જીવે પણ જ્ઞાતવસ્તુમાં જ યત્ન કરવા યોગ્ય છે, કારણ કે આગમ પણ આ જ વાત જણાવે છે. તે આ પ્રમાણે – "પ્રથમ જ્ઞાન પછી દયા, આ પ્રમાણે (=જ્ઞાનપૂર્વકની ક્રિયાને સ્વીકારવાવડે) સર્વ સાધુઓ રહે, કારણ કે અજ્ઞાની શું કરી શકવાનો છે ? અથવા શું પાપ અને શું પુણ્ય એ અજ્ઞાની કેવી રીતે જાણી શકવાનો છે ? ॥૧॥" (દશૈવકાલિક, અ.-૪)

'જ્ઞાન જ મહત્ત્વનું છે' – એ વાત જ સ્વીકારવા યોગ્ય છે, કારણ કે તીર્થંકર–ગણધરો વડે એકલા એવા અગીતાર્થની વિહારક્રિયા પણ નિષેધ કરાયેલી છે. તે આગમવચન આ રહ્યું– "પ્રથમ ગીતાર્થોનો વિહાર, બીજો ગીતાર્થમિશ્રિત વિહાર અનુજ્ઞાત છે. આ બે સિવાય ત્રીજો વિહાર જિનેશ્વરોવડે અનુજ્ઞાત નથી. ॥૧॥" ભાવાર્થ એટલો જ છે કે – એક આંધળો બીજા આંધળાને સમ્યગ્ માર્ગ દેખાડી શકતો નથી. (માટે જ્ઞાન પ્રાપ્ત કરવામાં જ યત્ન કરવા યોગ્ય છે.) આ પ્રમાણે ક્ષાયોપશમિકજ્ઞાનને આશ્રયી વાત કરી. ક્ષાયિકજ્ઞાનને આશ્રયીને પણ જ્ઞાન જ વિશિષ્ટ ફળને સાધી આપનારું જાણવા યોગ્ય છે, (માત્ર ક્રિયા નહીં.) કારણ કે ભવસમુદ્રના કિનારે આવેલા, દીક્ષાને પ્રાપ્ત કરી ચૂકેલા, ઉત્કૃષ્ટ એવા તપ અને ચારિત્રનું પાલન કરનારા એવા પણ અરિહંતોને ત્યાં સુધી મોક્ષની પ્રાપ્તિ થતી નથી, જ્યાં સુધી જીવ-અજીવાદિ સંપૂર્ણ વસ્તુને જાણવારૂપ કેવલજ્ઞાન તેમને ઉત્પન્ન થાય નહિ. તેથી જ્ઞાન જ ઐહિક-આમુષ્મિકફળની પ્રાપ્તિનું પ્રધાન કારણ છે. એ

૪૪. प्रथमं ज्ञानं ततो दया एवं तिष्ठति सर्वसंयतः । अज्ञानी किं करिष्यति ? किं वा ज्ञास्यति छेकं पापकं (वा) ? ॥१॥

૪૫ गीतार्थश्च विहारो द्वितीयो गीतार्थमिश्रको भणितः । आभ्यां तृतीयो विहारो नानुज्ञातो जिनवरैः ॥१॥

प्रधानमैहिकामुष्मिकफलप्राप्तिकारणमिति स्थितम्। 'इति जो उवएसो सो नयो नामं'ति 'इति' एवमुक्तेन न्यायेन यः उपदेशो ज्ञानप्राधान्यख्यापनपरः स नयो नाम ज्ञाननय इत्यर्थः । अयं च चतुर्विधे सम्यक्त्वादिसामायिके सम्यक्त्वसामयिकश्रुतसामायिकद्वयमेवेच्छति, ज्ञानात्मकत्वादस्य, देशविरतिसर्वविरतिसामायिके तु तत्कार्यत्वात् तदायत्तत्वान्नेच्छति, गुणभूते चेच्छतीति गाथार्थः ॥१०५४॥ उक्तो ज्ञाननयः, अधुना क्रियानयावसरः, तद्दर्शनं चेदं—क्रियैव प्रधानमैहिकामुष्मिकफलप्राप्तिकारणं, युक्तियुक्तत्वात्, तथा चायमप्युक्तलक्षणामेव स्वपक्षसिद्धये गाथामाह— 'णायंमि गिण्हियव्वे'त्यादि, अस्याः क्रियानयदर्शनानुसारेण व्याख्या—ज्ञाते ग्रहीतव्येऽग्रहीतव्ये चैव अर्थे ऐहिकामुष्मिकफलप्राप्त्यर्थिना यतितव्यमेव, न यस्मात् प्रवृत्त्यादिलक्षणप्रयत्नव्यतिरेकेण ज्ञानवतोऽप्यभिलषितार्थावाप्तिर्दृश्यते, तथा चान्यैरप्युक्तम्—

"क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् ।
यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात् सुखितो भवेत् ॥१॥"

तथाऽऽमुष्मिकफलप्राप्त्यर्थिना क्रियैव कर्तव्या, तथा च मुनीन्द्रवचनमप्येवमेव व्यवस्थितं, यत उक्तम् —

વાત સ્થિર થઈ. આ પ્રમાણેનો જે જ્ઞાનની પ્રધાનતા જણાવવામાં તત્પર એવો ઉપદેશ છે તે જ્ઞાનનય છે. આ જ્ઞાનનય સમ્યક્ત્વાદિ ચાર પ્રકારના સામાયિકમાંથી સમ્યક્ત્વસામાયિક અને શ્રુતસામાયિક આ બેને જ ઈચ્છે છે, કારણ કે આ બે સામાયિક જ્ઞાનાત્મક છે. જ્યારે દેશવિરતિ અને સર્વવિરતિસામાયિક જ્ઞાનનું કાર્ય હોવાથી (એટલે કે જ્ઞાનથી પ્રગટ થનારા હોવાથી) જ્ઞાનને આધીન છે. માટે આ છેલ્લા બે સામાયિકને જ્ઞાનનય ઈચ્છતો નથી, અર્થાત્ મુખ્યરૂપે ઈચ્છતો નથી, ગૌણપણે તો આ બે સામાયિકને પણ ઈચ્છે છે. **॥૧૦૫૪॥** જ્ઞાનનય કહ્યો.

❋ ક્રિયાનય ❋

હવે ક્રિયાનયનો અવસર છે. તેની માન્યતા આ પ્રમાણે છે. ક્રિયા એ જ ઐહિક - આમુષ્મિક ફળની પ્રાપ્તિનું પ્રધાન કારણ છે કારણ કે તે જ યુક્તિયુક્ત છે. આ નય પણ પોતાના પક્ષની સિદ્ધિ માટે ઉપરોક્ત ગાથા જ જણાવે છે. 'णायंमि गिण्हियव्वे'..... ઈત્યાદિ, ક્રિયાનય આ ગાથાની વ્યાખ્યા આ પ્રમાણે કરે છે – ઉપાદેય, હેય એવા અર્થોમાં ઐહિક-આમુષ્મિક ફળની પ્રાપ્તિના અર્થી જીવે યત્ન જ કરવા યોગ્ય છે. (જ્ઞાનનય 'ज्ञाते एव' એ પ્રમાણે 'જ' કાર જ્ઞાન સાથે જોડે છે. ક્રિયાનય 'જ' કાર યત્ન શબ્દ સાથે જોડે છે.) કારણ કે ઉપાદેયમાં પ્રવૃત્તિ, હેયથી નિવૃત્તિ વિગેરે રૂપ પ્રયત્ન વિના જ્ઞાનવાળાને પણ ઈચ્છિત અર્થની પ્રાપ્તિ થતી દેખાતી નથી. અન્યોવડે પણ કહેવાયેલું છે – "પુરુષોને ક્રિયા જ ફળ આપનારી છે, જ્ઞાન ફળ આપનારું છે એવું મનાયું નથી, કારણ કે સ્ત્રીભોગ, ભક્ષ્યભોગને જાણનારો એકલા જ્ઞાનમાત્રથી સુખી થતો નથી. ॥૧॥" તથા આમુષ્મિક ફળની પ્રાપ્તિના અર્થીએ ક્રિયા જ કરવા યોગ્ય છે અને જિનેશ્વરોનું વચન પણ ક્રિયાના મહત્વને જ જણાવનારા તરીકે રહેલું છે.

"चेइयकुलगणसंघे आयरिआणं च पव्वयण सुए य ।
सव्वेसुवि तेण कयं तवसंजममुज्जमंतेणं ॥१॥"[૪૬]

इतश्चैतदेवमङ्गीकर्तव्यं यस्मात् तीर्थकरगणधरैः क्रियाविकलानां ज्ञानमपि विफलमेवोक्तं, तथा चाऽऽगमः—

"सुबहुंपि सुयमहीयं किं काहि चरणविप्पमुक्कस्स ? ।
अंधस्स जह पलित्ता दीवसयसहस्सकोडीवि ॥१॥"[૪૭]

दृशिक्रियाविकलत्वात् तस्येत्यभिप्रायः, एवं तावत् क्षायोपशमिकं चारित्रमङ्गीकृत्योक्तं, चारित्रं क्रियेत्यनर्थान्तरं, क्षायिकमप्यङ्गीकृत्य प्रकृष्टफलसाधकत्वं तस्या एव विज्ञेयं, यस्मादर्हतोऽपि भगवतः समुत्पन्नकेवलज्ञानस्यापि न तावन्मुक्त्यवाप्तिः संजायते यावदखिलकर्मेन्धनानलभूता ह्रस्वपञ्चाक्षरोद्गिरणमात्रकालावस्थायिनी सर्वसंवररूपा चारित्रक्रिया नावाप्नेति, तस्मात् क्रियैव प्रधाना ऐहिकामुष्मिकफलप्राप्तिकारणमिति स्थितम्, 'इति जो उवएसो सो नओ नामं'ति 'इति' एवमुक्तेन न्यायेन य उपदेशः क्रियाप्राधान्यख्यापनपरः स नयो नामः, क्रियानय इत्यर्थः, अयं

તે આ પ્રમાણે - "ચૈત્ય, કુલ, ગણ, સંઘ, આચાર્ય, પ્રવચન, શ્રુત આ બધાનું કર્તવ્ય તેણે કર્યું છે, જે તપસંયમમાં ઉદ્યમી છે. (અર્થાત્ ચૈત્યાદિની ભક્તિ દ્વારા જે કર્મક્ષય પ્રાપ્ત થાય છે તેટલો કર્મક્ષય તપ અને સંયમમાં ઉદ્યમી જીવ પ્રાપ્ત કરે છે. તપ અને સંયમ ક્રિયારૂપ છે, માટે ક્રિયા જ મહત્ત્વની છે, જ્ઞાન નહિ.) ॥૧॥" આથી જ ક્રિયાનું મહત્ત્વ છે એ વાત સ્વીકારવા યોગ્ય છે, કારણ કે તીર્થંકર-ગણધરોએ ક્રિયાથી રહિત એવા જીવોનું જ્ઞાન નિષ્ફળ બતાવ્યું છે. આ રહ્યું તે વચન. "ઘણું બધું ભણાયેલું એવું પણ શ્રુત ચારિત્રથી રહિત જીવને શું કામનું છે ? (અર્થાત્ કોઈ કામનું નથી. જેમ કે) બળતા એવા લાખો, કરોડો દીપકો આંધળા વ્યક્તિને શા કામના ? કોઈ કામના નથી. ॥૧॥" કારણ કે તે આંધળી વ્યક્તિ જોવારૂપી ક્રિયાથી રહિત છે. આ વાત થઈ ક્ષાયોપશમિક ચારિત્રને આશ્રયીને, (અરે ! તમે તો ક્રિયાનું મહત્ત્વ બતાવવા માંગો છો ચારિત્ર ક્યાંથી વચ્ચે આવ્યું ? અરે ભાઈ !) ચારિત્ર અને ક્રિયા એ સમાનાર્થી શબ્દો જ છે.

ક્ષાયિકચારિત્રને આશ્રયી વિચારીએ તો પણ ક્રિયા જ વિશિષ્ટ ફળને સાધી આપનારી જાણવા યોગ્ય છે, કારણ કે કેવલજ્ઞાન ઉત્પન્ન થયા પછી પણ અરિહંત ભગવંતોને ત્યાં સુધી મોક્ષપ્રાપ્તિ થતી નથી, જ્યાં સુધી સંપૂર્ણ કર્મરૂપ ઇંધન માટે અગ્નિ સમાન, હ્રસ્વ પંચાક્ષરોના ઉચ્ચારણ જેટલો કાળ રહેનારી એવી સર્વસંવરરૂપ ચારિત્રક્રિયાની પ્રાપ્તિ થાય નહિ. ક્રિયા જ ઐહિક-આમુષ્મિક ફળ પ્રાપ્તિનું પ્રધાન કારણ છે, એ વાત નક્કી થઈ. આ પ્રમાણેનો જે ઉપદેશ છે અર્થાત્ ક્રિયાની પ્રધાનતા જણાવવામાં તત્પર જે આ ઉપદેશ છે તે ક્રિયાનય છે અને તે સમ્યક્ત્વાદિ ચાર

---

૪૬. चैत्यकुलगणसंघेषु आचार्ये प्रवचने श्रुते च । सर्वेष्वपि तेन कृतं तपःसंयमे उद्यच्छता ॥१॥

૪૭. सुबह्वपि श्रुतमधीतं किं करिष्यति विप्रमुक्तचरणस्य ? । अन्धस्य यथा प्रदीप्ता दीपशतसहस्रकोट्यपि ॥१॥

च सम्यक्त्वादौ चतुर्विधे सामायिके देशविरतिसर्वविरतिसामायिकद्वयमेवेच्छति क्रियात्मकत्वादस्य, सम्यक्त्वसामायिकश्रुतसामायिके तु तदर्थमुपादीयमानत्वादप्रधानत्वान्नेच्छति, गुणभूते चेच्छतीति गाथार्थः ॥१०५४॥ उक्तः क्रियानयः,

इत्थं ज्ञानक्रियानयस्वरूपं ज्ञात्वाऽविदिततदभिप्रायो विनेयः संशयापन्नः सन्नाह—किमत्र तत्त्वं ?, पक्षद्वयेऽपि युक्तिसम्भवात्, आचार्यः पुनराह—सव्वेसिंपि गाहा, अथवा ज्ञानक्रियानयमतं प्रत्येकमभिधायाधुना स्थितपक्षमुपदर्शयन्नाह—

सव्वेसिंपि नयाणं बहुविहवत्तव्वयं निसामित्ता ।
तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू ॥१०५५॥

व्याख्या : सर्वेषामपि मूलनयानाम्, अपिशब्दात् तद्भेदानां च 'नयानां' द्रव्यास्तिकायादीनां 'बहुविधवक्तव्यतां' सामान्यमेव विशेषा एव उभयमेव वाऽनपेक्षमित्यादिरूपाम् अथवा नामादीनां नयानां कः कं साधुमिच्छतीत्यादिरूपां 'निशम्य' श्रुत्वा तत् 'सर्वनयविशुद्धं' सर्वनयसम्मतं वचनं

સામાયિકમાંથી દેશવિરતિ અને સર્વવિરતિ સામાયિકદ્વયને જ ઈચ્છે છે, કારણ કે તે બંને સામાયિક ક્રિયાત્મક છે. જ્યારે સમ્યકત્વ-શ્રુતસામાયિક વિરતિ માટે જ ગ્રહણ કરાતા હોવાથી અપ્રધાન છે. તેથી આ નય પ્રથમ બે સામાયિકોને પ્રધાનરૂપે ઈચ્છતો નથી, ગૌણભાવે ઈચ્છે પણ છે. ॥૧૦૫૪॥ ક્રિયાનય કહેવાયો.

અવતરણિકા : આ પ્રમાણે જ્ઞાનનય અને ક્રિયાનયના સ્વરૂપને જાણીને સંશયને પામેલો અને આ નયોના અભિપ્રાય(ભાવાર્થ)ને નહિ જાણતો શિષ્ય પ્રશ્ન કરે છે કે - "અહીં વાસ્તવિકતા શું છે ? અર્થાત્ જ્ઞાન મહાન કે ક્રિયા મહાન, કારણ કે બંને પક્ષમાં યુક્તિઓ પ્રાપ્ત થાય છે. આચાર્ય જવાબમાં સવ્વેસિંપિ..... ગાથા જણાવે છે. અથવા જ્ઞાન-ક્રિયાનયમાં દરેકનાં મત કહીને હવે સ્થિતપક્ષને બતાવતા કહે છે ⇨

ગાથાર્થ : સર્વ નયોની ઘણા પ્રકારની વક્તવ્યતાને સાંભળીને, જે ચારિત્રગુણમાં રહેલો સાધુ છે તે જ સર્વનયોને સમ્મત છે.

ટીકાર્થ : દ્રવ્યાસ્તિક વિગેરે સર્વ મૂળનયોની પણ અને 'અપિ' શબ્દથી દ્રવ્યાસ્તિકાદિના ભેદોની (વક્તવ્યતાને સાંભળીને તે વક્તવ્યતા કેવા પ્રકારની છે તે કહે છે—) જગતવર્તી સર્વ વસ્તુઓ સામાન્યસ્વરૂપે જ છે અથવા જગતવર્તી સર્વ વસ્તુઓ વિશેષરૂપે જ છે, અથવા ઉભયરૂપ છે પણ એકબીજાથી નિરપેક્ષ છે (એટલે કે કેટલાક નયની અપેક્ષાએ જગતમાં સામાન્ય અને વિશેષ બંને રૂપે વસ્તુઓ છે પણ તે સામાન્યરૂપ વસ્તુ તદ્દન જુદી અને વિશેષરૂપ વસ્તુ તદ્દન જુદી, એકબીજાની અપેક્ષા વિનાની છે.) આવા પ્રકારની ઘણી વક્તવ્યતાઓને અથવા નામ-સ્થાપના વિગેરે નયોમાંથી કયો નય કયા સાધુને ઈચ્છે છે ? વિગેરે (એટલે કે કોને સાધુ માને ? વેષધારીને કે .... વિગેરે) એવી ઘણા પ્રકારની વક્તવ્યતાને સાંભળીને, જે સાધુ ચરણ=મૂળગુણમાં અને ગુણ=ઉત્તરગુણમાં

यच्चरणगुणस्थितः साधुः, यस्मात् सर्वनया एव भावनिक्षेपमिच्छन्तीति गाथार्थः ॥१०५५॥

इत्याचार्यहरिभद्रकृतौ शिष्यहितायामावश्यकटीकायां सामायिकाध्ययनं समाप्तम् ॥

सामायिकस्य विवृत्तिं कृत्वा यदवाप्तमिह मया कुशलम् ।
तेन खलु सर्वलोको लभतां सामायिकं परमम् ॥१॥
यस्माज्जगाद भगवान् सामायिकमेव निरुपमोपायम् ।
शारीरमानसानेकदुःखनाशस्य मोक्षस्य ॥२॥

સ્થિત છે અર્થાત્ આંતરિક ચારિત્રના પરિણામો અને બાહ્ય આચારોથી યુક્ત છે તે સાધુ જ સર્વનયોને સમ્મત છે, કારણ કે સર્વ નયો ભાવનિક્ષેપને તો ઈચ્છે જ છે. **॥૧૦૫૫॥**

આ પ્રમાણે આચાર્ય હરિભદ્રસૂરિવડે કરાયેલી શિષ્યહિતા નામની આવશ્યસૂત્રની ટીકાને વિશે સામાયિકાધ્યયન સમાપ્ત થયું.

સામાયિકનું વિવરણ કરીને જે કુશલ મારાવડે પ્રાપ્ત કરાયું છે તેનાવડે સર્વલોક ઉત્કૃષ્ટ સામાયિકને (એટલે કે ૧૪માં ગુણસ્થાને થનારા સર્વસંવરરૂપ ચારિત્રસામાયિકને) પ્રાપ્ત કરો. ॥૧॥ કારણ કે ભગવાને સામાયિકને જ શારીરિક-માનસિક અનેક દુઃખોના નાશરૂપ મોક્ષનો નિરૂપમ ઉપાય કહ્યો છે. ॥૨॥

॥ इति निर्युक्तिक्रमाङ्काद् ८८५ तमादारभ्य १०५५ क्रमाङ्कं यावद्
आवश्यकसूत्रस्य हरिभद्रीयवृत्तेर्गुर्जरानुवादस्य
चतुर्थो विभागः समाप्तः ॥

परिशिष्टम् - १

श्रीमन्मलधारगच्छीयश्रीमद्धेमचन्द्रसूरिसूत्रितं,

हरिभद्रीयावश्यकवृत्तिटीप्पणकम्

'**आरादेसादिवदि**'ति (२-११), आर् आत् एस् इत्येते आदेशा एतेषु च वर्णानां क्रमनिर्देशमात्रं विद्यते न पुनरभिधेयतया कश्चिदर्थः प्रतीयते इत्येवम्भूतं निरर्थकमभिधीयते । '**वाक्छलादी**'ति (३-३), अत्रादिशब्दादर्थच्छलपरिग्रहः, अत्र च द्वयेऽप्युदाहरणं विवक्षया नवकम्बल इत्याद्येकमपि भवति, अत्र हि नवः कम्बलो यस्येत्येवं नवकम्बलशब्दयोरेकवचनान्तत्वे नवशब्दस्य नूतनत्वाभिधायित्वे च विवक्षिते नवकम्बलशब्दयोर्बहुवचनान्तत्वकल्पने नवशब्दस्य सङ्ख्याभिधायित्वे च परिकल्प्यमाने वचनार्थयोरपि छलनोपपद्यते, भेदेन वा किञ्चिदुदाहरणान्तरं स्वधिया वाच्यमिति । '**गोशब्दवदि**'ति (७-८), गोशब्दो हि बहुपर्यायो बह्वर्थ इति तात्पर्यं 'दिशि दृशि वाचि जले भुवि दिवि वज्रेऽंशौ पशौ च गोशब्द' इतिवचनाद्, एवं सूत्रमपि बह्वर्थशब्दयुक्तं विधेयमिति । '**प्रतिमुखमनेकार्थाभिधायकं वा सारवदि**'ति (८-५), एतदुक्तं भवति—सारवद्विश्वतोमुखं चेति विशेषणद्वयं स्वतन्त्रतया सूत्रस्य व्याख्यातं, अथवैकमेवेदं सूत्रविशेषणमित्यनेन प्रतिपादयति, ततश्चेत्थं योजना—विश्वतो मुखं प्रतिमुखं प्रतिसूत्रं अनेकार्थाभिधायकं सत् सारवद्भवतीत्येकमेव विशेषणं, वाशब्दो व्याख्यान्तरसूचकः । '**निर्युक्तिस्त्वि**'त्यादि (९-४), विचारशब्देनेह चालना गृह्यते । '**धारिणीसहिओ ओलोयण**'मित्यादि (१६-३), अत्र भावार्थः—धारिण्या सहितो राजा अवलोकनं—गवाक्षं गतः, तत्र धारिणी कण्ड्वा गृहीतं भिक्षामटन्तं द्रमकं ददर्श, तं च दृष्ट्वा सानुकम्पा सती नदीसदृशा राजानो भवन्तीति स्वभर्तारमभिहितवती, यथा हि नद्यस्तोयपरिपूर्णं समुद्रमेव जलेन पूरयन्ति तथा राजानोऽप्यैश्वर्य्ययुक्तसामन्तादिभ्यो द्रव्यजातं ददति न पुनरीदृग्विधरङ्केभ्य इत्युपालब्धवती। '**ताओ भत्तगं नेच्छंति**'त्ति (१७-३), भोक्तुं नेच्छन्तीत्यर्थः । '**नोस्कन्धो नोग्राम इति वाक्यशेष**' इति (२०-७), नोस्कन्धो नोग्रामः स नैगमाद्यशुद्धनयमतेन जीवो नमस्कार इत्यर्थः ॥ तथा **सम्यग्दर्शनसाहचर्यादि**'त्यादि (२४-९) न केवलं ज्ञानावरणस्य दर्शनमोहस्य च क्षयोपशमेन साध्यते इति योगो, हेतुमाह—

★ પ્રથમ અંક પાના નં. અને બીજો અંક પંક્તિ નં. સૂચવે છે.

'सम्यग्दर्शनसाहचर्याज्ज्ञानस्य, एतदुक्तं भवति—यद्यपि श्रुतरूपत्वान्नमस्कारः श्रुतज्ञानान्तर्गतत्वान्मुख्यतया तदावरणक्षयोपशममेवापेक्षते तथापि दर्शनज्ञानयोः सहचारित्वाद्दर्शन-मोहक्षयोपशमेनापि साध्यते, अत उक्तं—दर्शनमोहस्य च क्षयोपशमेन साध्यते इति । '**नानाजीवान् (पुनर)ऽधिकृत्ये**'त्यादि (२७-६), उक्तमिदं केनाप्यभिसन्धिना गम्भीरवचसा वृत्तिकारेण, परं न सम्यगवगम्यते यतो नानाजीवानाश्रित्यैषा स्थितिः किमुपयोगतो लब्धितो वा ?, तत्र यद्युपयोगतस्तर्हि पीठिकायां ज्ञानपञ्चकविचारे मतिश्रुतज्ञानयोर्नानाजीवानाश्रित्योपयोगो जघन्यत उत्कृष्टतश्चान्तर्मुहूर्त्तिक एवोक्तो, नमस्कारस्यापि तदन्तर्गतत्वात्तत्कालप्रमाण एव स्याद्, अनेन त्वत्र जघन्यैवैषेत्यन्तर्मुहूर्त्तलक्षणा स्थितिरुक्ता उत्कृष्टतस्तु सर्वकालमिति कथं न विरोधः ?, अथ लब्धितः स्थितिरियमुक्ता तर्हि तस्याः सर्वकालभावित्वाज्जघन्यपदाभिधानमयुक्तं, तस्मादिहैवं द्रष्टव्यं—नानाजीवानाश्रित्योपयोगापेक्षया जघन्यत उत्कृष्टतश्चान्तर्मुहूर्त्तमेव लब्ध्यपेक्षया तु सर्व्वकालं स्थितिरिति, यदेनामेव गाथां विवृण्वन्नाह चूर्णिकारो—'नाणाजीवे पडुच्च उवओगो जहन्नेण उक्कोसेण य अंतोमुहुत्तं लद्धीए सव्वद्ध'मिति एवम्भूतेष्वपि च स्पष्टेषु चूर्ण्यक्षरेषु केनाप्यभिप्रायेण वृत्तिकृतेत्थमुक्तमिति न ज्ञायते गम्भीराभिप्रायत्वात्तद्वचसामिति[१] । '**अनेन चार्थान्तरेणे**'त्यादि (२७-९), अनेन—नमस्कारस्य पञ्चविधत्वप्रतिपादनेन नम इति पदस्यार्थान्तरेणार्हदादिना सार्द्धमादौ सम्बन्धः आदि-सम्बन्धस्तमाहेतियोगः, कया ? वस्तुस्थित्या—परमार्थेन, तत एतदुक्तं भवति—नम इति नैपातिकमेव पदमिति नास्य स्वरूपेण पञ्चप्रकारताऽस्तीत्येकस्वरूपस्यापि नमःशब्दस्य पञ्चप्रकारत्वं प्रतिपादयति चेत्तर्हि सामर्थ्यादेव निश्चीयते आत्मव्यतिरिक्तार्थान्तरभूतार्हदादि-पदपञ्चकाभिसम्बन्धादेवास्य पञ्चविधत्वमिति । '**संतपयं पडिवन्ने**' गाहा '**सम्मत्त**' गाहा (२८-९), व्याख्या—मग्गणत्ति अत्रानुस्वारो लुप्तो द्रष्टव्यः क्रिया च स्वयमध्याहार्या, ततश्च नारकादिषु चतसृषु गतिषु शेषेषु चेन्द्रियादिद्वारेषु चरमद्वारपर्यवसानेषु सत्पदं—नमस्कारलक्षणमाश्रित्य मार्गणं—प्ररूपणा कर्त्तव्येत्यर्थः, कानाश्रित्येत्याह—पूर्वप्रतिपन्नान् प्रतिपद्यमानकाँश्च, इयमत्र भावना—नरकगतौ नमस्कारस्य पूर्व्वप्रतिपन्ना नियमतः सन्ति प्रतिपद्यमानकास्तु भाज्याः, तिर्य्यग्गतौ पञ्चेन्द्रियेष्वेवमेव, विकलेन्द्रियेषु तु पूर्वप्रतिपन्नाः कदाचिद्भवन्ति न प्रतिपद्यमानकाः, एकेन्द्रियेषु तूभयाभावो, मनुष्यदेवगत्योस्तु

१. यद्यपि वर्त्तमानेषु बहुषु आदर्शेषु यथाभिप्रेत एव पाठस्तथापि सूरिदृष्टे आदर्शे भविष्यति पाठोऽन्यथाविध इति सर्वमेतदुदितं, पाठश्चैवं स्यात्तत्र 'नानाजीवान् पुनरधिकृत्य जघन्यैषैवोत्कृष्टतस्तु सर्वकालमिति' परं तत्रापि चूर्णिकारस्याक्षराण्यनुसृत्य नानाजीवानाश्रित्य जघन्यकाल उपयोगापेक्ष उत्कृष्टकालश्च लब्ध्यपेक्ष इत्यर्थावबोधने न काचित् क्षतिः, निर्युक्तिकारेण उपयोगस्यान्तर्मुहूर्त्तकालता प्रत्यपादीति 'एषैवेति वाक्येनानूदिता जघन्या, लब्धेस्तु निवेदिता पृथग्, उपयोगश्चोत्कृष्टतोऽप्यन्तर्मुहूर्त्तमानो नानाजीवानामविवक्षितः प्रसिद्धेरन्यत्र प्राग् बहुश उक्तत्वाद्वा, अत्र निर्युक्तिकारेण जघन्योत्कृष्टविभागमन्तरैवैकजीवमाश्रित्य स्थितिरुक्ताऽन्तर्मुहूर्त्तलक्षणा ।

नरकगतिवद्वाच्यमित्येवं शेषेष्वपीन्द्रियादिद्वारेषु सत्पदप्ररूपणा कार्येति गाथाद्वयार्थः। '**अनन्तद्वारत्रये**'त्यादि (२८-१४), अयमत्र भावार्थः— सत्पदप्ररूपणा तावन्निर्युक्तिकृता 'गइ इंदिए अ काए' इत्यादिना पीठिकायां सविस्तरमुक्तेति नेह प्रपञ्च्यते, द्रव्यप्रमाणादीनि तु द्वाराणि यद्यपि वृत्तिकृता तत्रैव भावितानि तथापि निर्युक्तिकृता न साक्षात्तत्राभिहितानीति पूर्व्वमनुक्तत्वादिह तानि साक्षआदभिधत्ते, अनन्तरया त्येकयैव गाथया द्वारत्रयं प्रतिपादयिष्यते, अतस्तदनुरोधादेव द्वारत्रयसङ्ख्याभिधानं, यावता सर्वाण्यपि प्रायो द्रव्यप्रमाणादीनि द्वाराणि पूर्व्वं साक्षादनुक्तत्वादिहाभिधास्यन्त इति। '**अन्यथा क्षायिके**'त्यादि (३०-६), एक इत्यनेनात्मनोऽरुचिं दर्शयति, यतो नमस्कारो मतिश्रुतान्तर्गत इत्युक्तं मतिश्रुते क्षायोपशमिकं भावमपहाय न कदाचिद्वर्त्तेते, श्रेणिकादीनां तु सम्यक्त्वं चारित्रं वा यदि क्षायिकादिभावे वर्त्तते तर्हि क्षायोपशमिकज्ञानान्तर्गतनमस्कारस्य किमायातं ?, तस्मात् क्षयोपशमभावे एव नमस्कारोऽस्य मतेनेत्यवसीयते, ये त्वन्यथाऽपि वर्ण्णयन्ति श्रेणिकादिनां ते तद्भावभावित्वमात्रतया सम्यक्त्व रूपतामप्यध्यवस्यन्ति नमस्कारस्येति अविरोधः॥ '**भत्तपाणं च तत्थ विभागउ**'त्ति (३८-१), विभागतः कस्मिँश्चित्प्रदेशे लभ्यते कस्मिँश्चिन्नेत्यर्थः '**एत्थ अट्ठ वाया वण्णेयव्वा**'इत्यादि (४२-९), इह यासु प्रज्ञापकः प्रश्नं वा शकुनं वा गृहीत्वा निमित्तं किञ्चिदालोचयति ताः प्रज्ञापकापेक्षयाऽष्टौ च दिशोऽष्टौ च विदिशो भवन्ति, तासु यथाक्रमं षोडशैव वातान् निरूपयन्नाह—'पाईणवाए'त्यादि, अत्र च स्थापना—



एतेषु षोडशवातेषु मध्ये यः प्रवहणानां प्रतिकूलो वातः स सर्व्वोऽपि कालिकावात-संज्ञोऽवगन्तव्योऽनुकूलस्तु गज्जभः ॥ '**कलिकलिंडु**'त्ति (५३-१), कलिकरण्डक इत्यर्थः। '**स्वगुणोपकारमूर्च्छात्मकत्वादि**'ति (५४-२), स्वे च ते गुणाश्च—जातिसम्पन्नतादयस्तेभ्यो य आत्मप्रतिष्ठाप्राप्त्यादिक उपकार-स्तन्मूर्च्छात्मकत्वाद्, एतदुक्तं भवति—मानस्तावत्स्वगुणबहुमानात्मकः

प्रतीत एव, मायापि परवञ्चनात्मिका स्वार्थलाभमूर्च्छितैरेव विधीयते, एवं च स्वगुणोपकारमूर्च्छात्मकत्वेन कृत्वा प्रीत्यन्तर्गतत्वान्मानमाये लोभस्वरूपे एव, अत्र मानादीनां यः प्रीत्यंशस्तस्य लोभेऽन्तर्भावोऽप्रीत्यंशस्य तु क्रोधे इत्येवमंशकल्पना कृता, ऋजुसूत्र मतेन त्वखण्डरूपा एव मानादयः प्रीतिरूपा लोभे त एवाप्रीतिरूपाः परिपूर्णा एव क्रोधेऽन्तर्भवन्तीति उक्तं न पुनस्तत्रांशकल्पना कृतेति शब्दादीनामृजुसूत्राद्भेदोऽन्यथा वा सुधिया समुत्प्रेक्षणीय इति ॥ '**सो परिखिज्जइ भत्तेण**'मित्यादि (५७-१), स हि राजा किलोपोषित-स्तीर्थमिति कृत्वा वासुपूज्यप्रतिमान्तिके प्रव्रज्याग्रहणार्थमुच्चलितोऽतः प्रत्याख्यानभङ्गार्थं भक्तादिना ताभ्यां निमन्त्र्यते । '**तो तं माहणा पहए**'त्यादि (६२-२), ततस्तं सुभूमं ते ब्राह्मणाः प्रहारैः प्रहतवन्तः ते च सर्व्वेऽपि प्रहारा मेघनादाख्यविद्याधरेण तेषामेव ब्राह्मणानामुपरि पात्यन्त इति । '**वट्टखिड्डुं**'ति (६७-८-**वड्डुखेड्डुं**), एकस्मिन् हस्ते गोलकद्वयमेकस्मिन् हस्ते गोलकत्रयं दर्शयित्वा पुनरिन्द्रजालप्रयोगेन केचिद् व्यत्ययेन गोलकान्यत्र दर्शयन्तीन्द्रजालिकाः तद् वट्टखिड्डुमुच्यते ॥ '**आकारमुक्तिश्चिक्कणिके**'ति (७५-१), मुच्यते असावति मुक्तिः—कर्मणि क्तिप्रत्ययः आकरे मुक्तिः—परित्याज्यं लोहकिट्टमित्यर्थः तद्धि गाद्ध्र्येनेव परस्परमतिनिभृततया बद्धं भवतीति तत्रापि लोभशब्दः प्रवर्त्तते, लुभ गार्द्ध्र्य इति व्युत्पत्तेः। '**पोत्ताइं फालेऊण**'त्ति (८०-१०), बहुमूल्यानि मार्गे सभयानीतिकृत्वा जीर्ण्णचीवराणि पाटयित्वा एकैकं खण्डं परिधाय प्रावृत्त्य च निर्गत इति भावः ॥ '**अंचिअं च वट्टइ**'त्ति (८१-८), अंचितं नाम दुर्भिक्षं तदासीदित्यर्थः ॥ '**सद्दवेहिणो य**'त्ति (८२-८), न केवलं सरजस्का आनीताः ये च शब्दानुसारेण शृगालादिजीवं विध्यन्ति ते च दिक्पालाः शब्दवेधिनश्चत्वार आनीता इत्यत्रापि सम्बध्यते । '**मायासवत्तीए य असमंजसाए**'इत्यादि (८६-६-**तस्स मंजूसाए**) मातृसवक्या चास्य निमित्तमिति गम्यते विषं प्रक्षिप्य मञ्जूषा नद्या प्रवाहिता ॥ '**अमाघाउ**'त्ति (८७-२) कस्मिंश्चित्पुण्यदिवसे अमारी उद्घोषिता इत्यर्थः । '**अस्य भावार्थ** इति (९१-३), अस्य तत्त्वार्थभणितसूत्रस्य भावार्थः कारिकाभिरुच्यते, ताश्चेदानीं कारिका यथावैषम्यसम्भवं व्याख्यायन्ते—'**सर्व्वाहारप्रियत्वविदि**'ति (९१-८), सर्वेषां जीवानां आहारप्रियत्वं वेत्ति स तथा यथा हि ममाहारः प्रियस्तथा अन्येषामपि जन्तूनां स एव प्रिय इत्येवं जानन् स्वशरीरगतशोणितपानरूपाहारप्रवृत्ता दंशमशकास्तान्न वारयेदित्यर्थः । '**सङ्गपङ्कसुदुर्बाधा**' इति (९१-१०), सङ्ग एव पङ्कः सङ्गपङ्कः सुष्ठु दुःखेन बाध्यते सुदुर्बाधः—सङ्ग पङ्कः सुदुर्बाधो यासां ताः सङ्गपङ्कसुदुर्बाधा दुष्परित्याज्यसङ्गा इत्यर्थः । '**श्मशानादिनिषद्यास्वि**' त्यादि(९२-२), श्मशानादिषु समुद्भूतानुपसर्गानेको—रागद्वेषविरहितः क्षमेतेति योगः, कथम्भूतान् ?—अनिष्टेष्टान् तत्रानिष्टा व्यन्तरादिकृताट्टट्टहासादयस्तान् अभीः—निर्भयः सन् सहेत, इष्टास्तु दिव्याङ्गनाप्रार्थनादयस्तान्

अस्पृहो–विगततदभिष्वङ्गः सहेतेति यथासङ्ख्यं सम्बन्धः, क्व सहेतेत्याह–'**स्त्र्यादिकण्टकवर्जिते**' (९२-२), तत्र वर्ज्जनं वर्ज्जितमभाव इत्यर्थः स्त्र्यादय एव मोक्षपथप्रवृत्तानां विघ्नहेतुत्वेन कण्टका इति कण्टकास्तेषां वर्ज्जितं–अभावस्तस्मिन् सति, एतदुक्तं भवति–प्रथमं स्त्र्यादिकण्टकाभाववत्यपि श्मशानादिस्थाने समाश्रिते यदि पश्चात्कथञ्चिदागन्तुका इष्टा अनिष्टा वोपसर्गाः प्रादुर्भवन्ति तान् सम्यगेवारक्तद्विष्टः सहेतेति श्लोकार्थः । 'शुभाशुभास्वि'त्यादि, मनोज्ञामनोज्ञासु शय्यासु–वसतिषु लब्धासु सतीषु तत्र मनोज्ञायां सुखे समुपस्थिते सति सङ्गं–तत्सुखाभिष्वङ्गं नेयात्–न गच्छेत् दुःखे च समुपस्थिते दुःखं सहेत नोद्विजेतेति यथाक्रमं सम्बन्धः, किं पुनश्चेतसा भावयन्निदं कुर्यादित्याह–किं ममानया (मनोज्ञयाऽ) मनोज्ञया वा कर्त्तव्यं ?, यतः श्वः–आगामिनि दिने त्याज्या परिहर्त्तव्येयं, साधूनामेकत्रावस्थितेरभावात् कोऽत्र प्रतिबन्धो द्वेषो वेत्येवं मनसा परिभावयेदिति श्लोकार्थः । '**नाक्रुष्ट**'इत्यादि श्लोकः (९२-४), सुगमो, नवरं 'साम्या'दिति रागद्वेषविरहितः सम उच्यते तस्य भावः साम्यं तस्मात्, किमुक्तं भवति ?–परेणाक्रुष्टोऽपि समतामवलम्ब्य सहेत न पुनस्तमाक्रोशेदिति । 'हतः सहेतैवे'त्यादि (९२-५), केनचिल्लकुटादिना हतः–ताडितः सन् सहेत न पुनस्तं घ्नन्तं प्रतिहन्यात्, कथम्भूतः?–साम्यमिति पूर्ववद्वेत्ति साम्यवित् क्षमैव कर्त्तव्या न परं प्रति क्रोधो मनसाऽपीति, अत्रोपपत्तिद्वारेण भावनामाह–'**जीवानाशात्**' यद्यपि लकुटादिना ताडितोऽहं तथापि न ममानेन जीवितनाशः कृतो, यदिवाऽसौ तमपि कुर्यात्को निवारयेत् ?, तस्मान्ममैषोऽपि लाभो यदनेन जीवितनाशो न कृतः, इत्येवं भावना भावनीया, यतीनां शास्त्रविहितत्त्वात्, यदाह– *"अक्कोसहणणमारणधम्मब्भंसाण बालसुलहाणं । लाभं मन्नइ धीरो जहोत्तराणं अभावंमि ॥१॥"* किञ्च–क्षमायोगाद्गुणाप्तेः, भवन्ति हि क्षमावतामिह लोके यशःकीर्त्त्यादयः परलोके च सुगतिप्राप्त्यादयो गुणाः, '**क्रोधदोषत**' इति क्रोधे सति दोषः क्रोधदोषः तस्माच्च क्षमैव कर्त्तव्या, सम्भवन्ति हि क्रोधवतामिहलोकेऽपि प्राणनाशाकीर्त्त्यादयः प्रेत्य च नरकगमनादयो दोषा इति श्लोकार्थः । '**अजानन् वस्त्वि**'त्यादि (९३-३), यद्यपि विवक्षितं किञ्चिज्जीवाजीवादिवस्तुजिज्ञासुः–बोद्धुमिच्छुर्न तत्स्वरूपं जानाति तथापि न मुह्येद्वि(द्वान्) जन्मापि विफलं मम गर्भेऽपि किं नाहं विलयमुपगत इत्यार्त्तध्यानरूपां विचित्ततां न कुर्यादित्यर्थः, कथम्भूतः ? '**कर्म्मदोषवित्**' यो हि रागद्वेषोपहतैर्जन्तुभिः अन्यजन्मनि यान्युपचितानि ज्ञानावरणादिकर्म्माणि तद्विलसितमेवेदं नात्रात्मानं विहायापरः कश्चिदपराध्यतीत्येवं कर्म्मदोषं जानाति स कथमार्त्तरूपां विचित्ततामुपगच्छेत् ? प्रत्युत सद्बोधावरणकर्म्मक्षपणाय धर्म्मध्यानमेवानुतिष्ठेद्, अन्येषां च ज्ञानिनां चतुर्दशपूर्व्वधरादीनां सातिशयज्ञानमन्वीक्ष्य 'तथैवेति'यथा निन्दात्मरूपमोहपरित्यागः पूर्वार्द्धे प्रतिपादितस्तथैव कुर्याद् 'अन्यथा नत्वि'ति परेषु सद्बोधमात्मनि चाज्ञतामवलोक्य न मोहपरित्यागरूपप्रतिपादितोपदेशादन्यथा

विधेयं, नात्मनिन्दादौ प्रवर्त्तितव्यमिति भाव इति श्लोकार्थः । सर्वेऽपि चैते परीषहाः '**ज्ञानावरणवेद्योत्था**' इत्यादिना (९४-१), चतुर्षु कर्म्मस्वन्तर्भवन्तीत्युक्तं केवलं विवृण्वता ज्ञानावरणान्तरायवेदनीयान्तर्भाविन एवोक्ता न मोहोदयजन्याः, ते चामी द्रष्टव्याः—'*अरई अचेल इत्थी निसीहिया जायणा य अक्कोसे । सक्कार पुरक्कारे सम्मत्तं अट्ठ मोहम्मि ॥१॥*' एते सर्वेऽपि परीषहाः कस्य स्वामिनः कियन्तः सम्भवन्तीति प्रतिपादयन्नाह—'**चतुर्दशैत**'इत्यादि (९४-४), स इति संभवोऽभिसम्बध्यते । '**किण्हवन्नएणं**'ति (९५-५), तिलखलेनेत्यर्थः । '**सिरिघरदिट्ठंत**'मित्यादि (९६-६), श्रीगृहं—भाण्डागारमुच्यते, तद्दृष्टान्तश्चायं—स क्षुल्लको राजानमुवाच—यदि कश्चिद्युष्मद्भाण्डागारं विनाशयति तर्हि भवन्तस्तस्य प्राणनिग्रहादिदण्डं कुर्व्वते न वेति वाच्यं, कुर्म एवेति राज्ञोक्ते क्षुल्लक आह—यद्येवं मयाऽपि ज्ञानादिरत्नत्रयरूपात्मीयश्रीगृहलुण्टने प्रवृत्तेयं दण्डिता न ममापराध इत्येष श्रीगृहदृष्टान्तः । '**सो य किल सुसीस**'इत्यादि (९७-२), स च किल चन्द्रगुप्तश्चाणक्यस्याज्ञाकारी सुशिष्य आसीद्, अत्र च चाणक्येन चिन्तितं—मया तावदसौ जैनधर्म्मे प्रवर्त्तनीयः, केवलमुपायान्तरेण, अन्यथा मां पक्षपातिनं निश्चेष्यतीत्यभिहितं—राजन् सर्व्वेऽपि तीर्थिका आकार्य क्रमशोऽन्तःपुरे धर्म्मदेशनं कार्यन्ते, एतद्रूपदर्शनेन सविलासजल्पितादिभिश्च न क्षोभ्यन्ते तेषां विगतरागद्विषां सम्बन्धी धर्म्मस्त्वया कार्य इत्याह—'**अंतेउरधम्मकहण**'मित्यादि । '**उस्सरिउ**'त्ति (९७-४), ओसरिओ—क्षणमेकं स्थित्वा शरीरचिन्तादिव्याजेन यतिक्षोभननिमित्तं पुनरपि निर्गत इति भावः ॥ '**रायसन्नाय**'मित्यादि (९७-५), तेनेर्ष्यालुना राजविदितं नगरे उद्घोषितं—मम गृहे न केनचित्प्रवेष्टव्यं सप्तवृत्तिपरिक्षिप्तं गृहं कारितं। '**उद्देसिइ चेइए**'त्यादि (९८-६), औद्देशिके स्निग्धमधुरादिके चितिते—केनचिद्दत्ते सति तया प्राभृतिकया अजीर्ण्णया सत्या ये शिरोवेदनादयः समुपजायन्ते सामान्यतस्ते आत्मसंवेदनीयोपसर्गाः, साम्प्रतं विशेषत आह—'ते चउव्विहे'त्यादि '**सुत्तो थद्धो जाउ**'त्ति (९९-२), चरणादिरवयव इति गम्यते । '**अपान्तरालिकं नमस्कारफल**'मित्यादि (१०२-९), ननु चापान्तरालिकं स्वर्गादिफलमभिधीयते, पातनाक्रमायातगाथायां तु 'जीवं मोएइ भवसहस्साउ' इत्यनेन मोक्षलक्षणं फलमभिधास्यते तत्कथं पातनागाथार्थयोर्न विरोध इति ?, तदयुक्तं, अभिप्रायापरिज्ञानात्, न ह्यत्र स्वर्गादिफलापेक्षयाऽपान्तरालशब्द उक्तः किन्तु 'उप्पत्ती निक्खेवो पयं पयत्थो' इत्यादिमूलद्वारगाथाक्रमेणार्हदादीनां पञ्चानामपि नमस्कारस्य यत्समुदितं पर्यन्ते फलमभिधास्यते तदपेक्षया मोक्षलक्षणमपीदं प्रसङ्गत उच्यमानमपान्तरालिकं विवक्षितमिति न विरोधः । '**धंतंपी**'ति (१०५-२) अत्यर्थमपि समर्थचित्तेनेत्यर्थः । '**तप्पणईणं**' गाहा (१०५-३), यस्मादेवं पूर्वोक्तनीत्या स एव शुभचित्तनिबन्धनत्वेनापत्कालाद्युचितः तस्मात् तम्—अनन्तरोक्तं द्वादशाङ्गं श्रुतस्कन्धं प्रणयन्ति—अर्थतः सूत्रतो वा विरचयन्तीति तत्प्रणयिनो, यदिवा तस्य—

प्रस्तुतनमस्कारस्य योग्यास्तत्प्रणयिन उच्यन्ते अर्हदादय एव तेषां शुभेन चेतसा अयमेवाधिकृतनमस्कारः कृतज्ञतां कृतार्थतां चात्मनो मन्यमानेनानुस्मरणीयो—विधेय इति गाथार्थः । '**अर्थत**' इति (१०६-६), सिद्धशब्दाभियतामात्रेणेत्यर्थः । '**कौंकणा**'इत्यादि (१०८-१ कोंकणगदेसे), एकस्मिन्दुर्गे निवसन्तः कुङ्कुणदेशोद्भवाः पुरुषाः सह्यनाम्नः पर्वताद् गोधूमगुडघृततैलादिभाण्डमवतारयन्त्यारोहयन्ति च । '**कुंदुरुक्कपडिबोहियल्लउ**'त्ति (१०८-४), कुक्कुडेन रुतं कुर्व्वता प्रातर्न्निद्रां त्याजितः सन् इति भावः । '**रित्तत्थिक्कस्स**'त्ति (१०८-७), रिक्तस्य स्थितस्येत्यर्थः । '**अब्भुट्ठिउ**'त्ति (१०९-५), सोऽपि सिद्धकस्तत्रान्तरे संवेगमुपगतः—प्रव्रज्यां जग्राहेत्यर्थः ॥ '**सो य मूयभावेणे**'त्यादि (११०-१), दासीसुतः किल शिल्पविद्याध्ययनं न कार्यते, ततश्च रथकारेण स्वपुत्रेष्वध्याप्यमानेषु स दासीसुतो मूकत्वेनावतिष्ठते किलाहं न किञ्चित् शृणोमीति, अथ च सर्वां शिल्पविद्यामवधारयतीति भावार्थः । '**किंकम्मय**'त्ति (१११-४), किंकर्म्म गच्छन्तीति किंकर्म्मगाः, भवन्तः कमधिकारं कृतवन्त इति पृष्टाः । '**इमेण तं संघाइय**'मित्यादि (११३-१), अनेन कोकाशवर्द्धकिना यदर्द्धनिष्पन्नमासीच्चक्रं तत्परिपूर्णं निष्पादितं, कीदृशं च स्वविज्ञानातिशयात् कृतं तदित्याह—ऊर्द्ध्वीकृत्य प्रक्षिप्तं सद् याति बहुतरं भूदेशमाक्रामति अग्रे च कुड्यादौ प्रतिघातस्थाने प्रस्खलितं निवृत्तं सत् न तत्रैव निपतति किन्तु प्रतिमुखं निवर्त्तते यावतो भूभागात्प्रक्षिप्तं तावन्तं पुनरपि निवृत्तं सदाक्रामतीत्यर्थः, ऊर्द्ध्वस्थानेन च स्थितं सन्न पतति किन्तु तथैव तिष्ठति, इतरस्य च तन्नगरवासिनो वर्द्धकेः सत्कं यत्नेन घटितं तत्किमित्याह—'**जाती**'त्यादि (११३-२)सुगमं। '**महाविस्संदा दोन्नि**'त्ति (११६-३), द्वे पाषाणमयकुण्डिके तत्राभूतामित्यर्थः । '**तेसिं कप्पराण**'मित्यादि (११६-८), तेषां चाकाशेन गच्छत्पात्राणामग्रतः सितवस्त्रपिधानः पतद्ग्रहको गच्छति तन्मध्यस्थिता च टोप्परिका—कडाहिका कस्यचिदुपासकस्य गृहे गता, सा च सर्वप्रवरे आसने तैरुपासकैः स्थापिता, अन्यथाऽनादरेण दृष्टा सती अगृहीत्वैव भक्तपानादिकं स्वस्वामिनोऽन्तिकमायाति सातिशयत्वादिति भावः । '**कट्ठविरूढगो**'त्ति—(१२१-४), एकस्मिन्काष्ठे समारूढोऽन्यानि समाकर्षति । '**कादाचित्कं वा कर्म्मे**'त्यादि (१२५-६), यत् किल पीठफलकादिनिर्मापणं तस्मिन्नेव क्षणे प्रारब्धं तस्मिन्नेव निष्पद्यते न पुनः प्रासादादिवन्नित्यं प्रतिदिनं क्रियते तत्कादाचित्कं कर्म्माभिधीयते, प्रासादादिनिर्माणं तु बहूनि दिनानि यावन्नित्यव्यापारं शिल्पमुच्यते । '**भरहदारएणं**'ति (१२९-४), भरतो-नटस्तत्पुत्रेण । '**अगडे**'त्ति (१३१-१), राज्ञा समादिष्टं—कूप एकः प्रेषणीयो, रोहकेणोक्तं—आरण्यको ग्राम्यकूप एकाकी समागच्छन् बिभेतीति भवद्भिर्नागरिककूपः प्रेष्यो यतस्तेन सममात्मीयं प्रेषयामः । '**वणसंडो**'त्ति, तस्य ग्रामस्य पूर्वस्यां दिशि वनखण्ड आसीत्, स च पश्चिमायां दिशि प्रक्षेप्तव्य इति राज्ञा समादिष्टं, रोहकेण तु ततः

स्थानादुच्चाल्य तस्यैव वनखण्डस्य पूर्वदिग्भागे ग्रामं संस्थाप्य राजवचोऽनुष्ठितं । 'क्षीरान्नं चाग्निं विना संस्करणीय'मित्यादिष्टे उत्कुरुटिकायां रविकिरणतप्तकरीषपलालाद्युष्मणा संस्कृतमित्याह—'**परमन्न**'मित्यादि (१३१-२), '**चक्कमज्झभूमीए**'त्ति (१३१-५), गन्त्रीचक्रोत्थापितरेखामध्येन स हि किल नोत्पथो नापि मार्गश्च, चक्राक्रान्तरेखाद्वयमध्यस्यैव लोकरूढ्या मार्गत्वादिति भावः। '**पडिक्कमोरूढो**'त्ति (१३१-५—वृ०एडगारूढो), तदारूढो हि किलावनिं पादाभ्यां स्पृशति ततश्च न चरणैर्नापि यानेनेत्याराधितं भवति। '**वासदेयभंडाणं विक्कओ जाउ**'त्ति (१३५-२), यावद्भाण्डं वर्षेण विक्रीयते तावदेकदिवसेन विक्रीतमिति भावः । '**उट्टवामि**'त्ति (१३५-८), उष्ट्रा इत्यर्थः। '**लक्खाविउ**'त्ति (१३७-६—वृ० लक्खाए विलिंपित्ता) वैद्येन स कृकलासो लाक्षारसेनानुलिप्तो येन मदीयोदररक्तानुलिप्तोऽसाविति तस्य भ्रान्तिः समुत्पद्यते । '**गयघयणगोलखंभे खुड्डगमग्गित्थि पइपुत्ते**' इत्यत्र (गाथा ९४०) गयत्ति द्वारमाश्रित्य केचिन्न गजदृष्टान्तं व्याचक्षतेऽपि तु गतगोदृष्टान्तमित्याह—'**अन्ने गाविमग्गो सिलाए**'त्यादि (१४०-२) अत्र च भावार्थः—तस्करैर्गावोऽपहृतास्तासां च शिलानिचयाकीर्ण्णमार्गेण नीतत्वात्पदं नोपलभ्यते अपरस्य तु कस्यचित् स्वबुद्धिप्रकर्षादुदरावष्टम्भेनावाङ्मुखनिपतितस्योदरे गवां पदानि प्रतिबिम्बतानि तदनुसारेण मार्गमुपलभ्य निवर्त्तितास्तेन गाव इत्यस्यौत्पत्तिकी। '**उवाहणाणं भारेण उवट्ठिउ**'त्ति (१४०-५), यदा ह्यसौ भण्डो देव्या निर्विषयः समाज्ञातस्तत उपानद्ग्रथितमालां वंशप्रान्तेऽवलम्ब्य देव्याः समीपमागतः, पृष्ठश्च तया—किमेषोपानन्माला ?, स प्राह—एवम्भूता निरामया तस्य राज्ञो देवी वर्त्तत इत्येवम्भूता त्वत्कीर्त्तिरितः स्थानात् त्वया निष्कासितेन मया बहुषु देशेषु नेतव्या, न चैतावदुपानद्व्यतिरेकेण तावन्तो देशाः पर्यटितुं शक्याः, ततो देव्या चिन्तितं—साम्प्रतं तावदेष एवैतज्जानाति निर्गतस्तु सर्वत्र मां विडम्बयिष्यति तस्मादिहैव तिष्ठत्वेष इति भीतया तत्रैव धृत इति भावार्थः। '**हत्थो दूरं पसारिउ**'त्ति (१४२-२), कारणिकैर्हि द्वयोरप्यत्यन्तसदृशं रूपं दृष्ट्वा निश्चितं—न व्यन्तरिकामन्तरेणैवम्भूतं सर्वावयवैरविसंवादिरूपं कश्चिन्निर्वर्त्तयितुं क्षमो, निसर्गेण हि यत्र द्वयोः सादृश्यं भवति तत्रावश्यं कश्चिदवयवः कथञ्चिद्विसंवादी भवति, नैवमत्र तस्मादनयोरेकयाऽवश्यं व्यन्तरिकया भाव्यं, परं काचिदिति न ज्ञायतेऽतस्तत्परिज्ञानार्थं तैस्तद्भर्त्ता दूरं प्रेषितः, ते च द्वे अप्यभिहिते—तस्य पुनरप्यत्रागतस्य सतो भवत्योर्मध्ये या प्रथममासनं दास्यति तस्या एवासौ भर्त्तेत्यभिधाय पुनरेवाकारितः, तस्य चागच्छतो व्यन्तरिकयाऽपर्यालोचितकारित्वात् सहसा दिव्यानुभावेन करमतिदूरं प्रसार्य्यासनं दत्तमतोऽवगतं कारणिकैरेषा व्यन्तरीति भावार्थः । '**एवं नायं (असद्दहंतेसु) पुणोवि पट्ठविऊणे**'त्यादि (१४३-५), एवं ज्ञातममात्येन योऽनया पूर्वस्यां दिशि प्रेषितः स द्वेष्यो, राजादयस्तु नेदं श्रद्दधति भणन्ति च—अवश्यं द्वयोर्मध्ये एकः कश्चनापि पूर्व्वस्यामपि

प्रेषणीयः किमत्र द्वेष्यत्वं ?, इत्येवं तेष्वश्रद्दधानेषु पुनरप्यमात्येन तद्भर्तृद्वयं पूर्वापरदिग्वर्त्तिग्रामयोः प्रस्थाप्य तयोः शरीरकारणवार्त्तासूचकौ युगपद् द्वौ पुरुषौ तदृहे प्रेषितौ, ताभ्यां च प्रत्येकं तद्भर्तृद्वय-शरीरकारणमात्यन्तिकं तस्यै निवेदितं, तया च लोकचित्तानुवृत्त्यर्थमुक्तं—यद्यपि द्वयोरपि समानमात्यन्तिकं शरीरकारणं तथापि एष यः पश्चिमायां दिशि प्रेषितः स मन्दसंहननोऽसमर्थो वेदनानिवहमधिसोढुं अतः स एव प्रतिजागरोचित इति मायावचोविरचनां विधाय तस्यैव समीपं गता, नेतरस्येति, राज्ञाऽप्यवगतं यदुतास्या अयमेव प्रिय इति भावार्थः । '**सित्थगकरो**'त्ति (१४४-४), मधुसिक्थकरः सर्वप्रकृतिभ्यो राज्ञा याचित इति भावः । '**उब्भामिय**'त्ति (१४४-५) कुशीलेत्यर्थः । '**पडुप्पाइयं**'त्ति (१४४-५), उपपतिना सार्द्धं निधुवनसमये उत्तानया स्थितया जाल्या मध्ये भ्रामरं मधु दृष्टमिति भावार्थः । '**वाउत्तिए**'त्ति व्यागुप्तया मधुसिक्त्थादर्शनेन व्याकुलया, अनेन संस्थानेन स्थितां दृष्ट्वा मद्दुश्चरितमसौ ज्ञास्यतीति विचारशून्ययेत्यर्थः । '**पुरोहिओ निक्खेवए घेत्तूणे**'त्यादि (१४५-१), एकस्मिन्नगरे पुरोहितः प्रतिवसति, तत्समीपे च तीर्थयात्रादिप्रवृत्तलोका निक्षेपकान् मुक्त्वा व्रजन्ति, स चान्येभ्यः प्रत्यागतेभ्यस्तान् समर्प्पयति, एकेन तु द्रमकेन यन्मुक्तं तन्न प्रयच्छति, स च तदलाभात्पिशाचीभूतस्तं पुरोहितं स्वद्रव्यं याचमानो मार्गे गच्छताऽमात्येन ददृशे, संजातकृपेण चानेन राज्ञे निवेदितं, अन्यदा च पुरोहितेन नक्तं राज्ञा समं द्यूतक्रीडाप्रवृत्तेन हारिते सति स्वनामाङ्कितमुद्रिका ग्रहणके सारिता, ताञ्च पूर्व्वसङ्केतितपुरुषो राज्ञः सकाशादृहीत्वा पुरोहितगृहं ययौ, तन्मुद्रिकासाभिज्ञानेन च तद्भार्य्यायाः सकाशाद्रमकगृहीतद्रव्यं समानीय राज्ञः समर्प्पितवान्, राज्ञा च स द्रमकनिवलकः स्वद्रव्यभृतनिवलकानां मध्ये प्रक्षिप्तः, स च द्रमक आकार्योक्तः—अमीषां मध्ये यस्त्वदीयस्तं गृहाण, तेन च प्रत्यभिज्ञाय स्वकीयो गृहीत इत्ययमत्र भावार्थः, एतदनुसारतश्च चूर्ण्यक्षराणि नेयानि । '**तहेव एगेण निक्खित्तं**'ति (१४६-१), तथैवैकेन पथिकेन कस्यचिद्वणिजः समीपे सहस्रद्रव्यभृतनिवलको न्यासीकृतः तेन च वणिजा स उत्सीवितः शुद्धद्रम्माः स्वयं गृहीताः स च कूटद्रम्मैर्भृतः, कूटाश्च किल निस्सारत्वात् स्वल्पं देशं रुन्धन्तीत्यधस्तात्कर्त्तयित्वा सङ्कटीकृत्य पुनरपि सीवितः, शुद्धद्रम्मास्तु बहुद्रव्यत्वात्किल प्रभूतदेशे मान्तीति, विवादे सञ्जाते कारणिकैः पुनरपि शुद्धद्रम्माणां सहस्रे तु प्रक्षिप्ते नासौ निवलकः सीवितुं शक्यते अतो ज्ञातं वणिग्विलसितमिदमिति भावार्थः । अन्ये त्वन्यथापि भावयन्ति, तच्च विस्तरभयान्नोच्यतेति । '**नाणए तहेव निक्खेवतो**'इत्यादि (१४६-३), अत्रापि कस्यचिद्वाणिजः समीपे शुद्धबहुमूल्यचउल्लकादिद्रम्मस्वरूपनाणकभृतनिवलको न्यासीकृतः, तेन वणिजा ते द्रम्मा बहुमूल्यत्वात्स्वयं गृहीतास्तत्र च निवलके अल्पमूल्याशुद्धपणाभिधं नाणकं प्रक्षिप्तं, स्वामिनि चागते समर्प्पितो निवलकः, तेन चोक्तं—नेदं मदीयं नाणकं, त्वया परावर्त्तितमिदमिति, विवादे संजाते

कारणिकैरुक्तं—भो पथिक! कस्मिन् संवत्सरे त्वया इदं अस्य समर्पितं ?, कथितश्चानेन संवत्सरः, ततः कारणिकैर्वणिग् निर्भर्त्सितस्तस्मिन्काले पणानां निष्पत्तिरेव नासीद् आधुनिकत्वादमीषां, तदाऽविद्यमानास्तवानेनैते कथं समर्प्पिताः ?, तस्माद्यदस्य सत्कं नाणकं तत्समर्प्पय, समर्प्पितं च तत् वणिजा, दण्डितश्च राज्ञेति भावार्थः एतदनुसारतश्चूर्ण्यक्षराणि नेयानि। '**अन्नेवि भिक्खइंतगा**' इत्यादि (१४७-३), यदा हि तेन भिक्षुणा तस्मै निक्षेपकः समर्प्पितः तदा द्यूतकारैरुक्तम्—अन्येऽपि भिक्षवोऽस्माभिः सह समायातास्तिष्ठन्ति ततस्तेऽप्यस्यां युष्मन्मञ्जूषायां सर्व्वं सुवर्ण्णं स्थापयिष्यन्त्यतस्तानप्याकारयाम इति व्याजेनोत्थाय सर्व्वे निष्क्रान्ता इति भावार्थः। '**पिइमिस्सय**'त्ति(१४८-६), मातापित्रोः पूज्यवचनमिदं मातापित्रादय इत्यर्थः। '**वड्ढिपउत्तं न उग्गमइ**'त्ति (१४९-७), भर्तारमन्तरेण कलान्तरदत्तं द्रव्यं न लभत इत्यर्थः। '**परिभट्ठउ**'त्ति (१५०-३) परिव्राजकः। '**तज्जाएण य तज्जायं सिलोगो**'त्ति (१५२-९), *"तज्जाएण य तज्जायं, तन्निभेण य तन्निभं। तारुवेण य तारुवं, सरिसे सरियं विणिद्दिसे ॥१॥"* इत्येवं चूडामणिपठितश्लोकोऽयं द्रष्टव्यः। '**बीओ आपुच्छइ—सब्भाव**'मित्यादि (१५३-२), द्वितीयो येन न सम्यगवगतं स उपाध्यायं पृष्टवान्—ममानेन सार्द्धं सममेवाधीयानस्य न शास्त्रसद्भावमावेदयसि त्वं, अस्य तु सम्यक्कथयसीति तं सकोपाभिसन्धिमालोक्योपाध्यायस्तौ पप्रच्छ—कुतो व्यतिकरादिदमभिधीयते ?, ताभ्यां सर्व्वं यथावृत्तमावेदितमुपध्यायाय, तत्रैकः प्राह-मया घटस्य विपत्तिमालोक्य "**तज्जाएण य तज्जाय**" मित्यादि पर्यालोचयता वृद्धासुतस्य मरणमादिष्टं, अपरस्त्वाह—ममेत्थमवगतं, घटस्तावदयं भूविकारो भग्नः सन् भुव एव मिलितः एवं सोऽपि वृद्धासुतस्तदुद्भवत्वात्तस्या एव मिलिष्यति, यदुक्तं—"**तज्जाएण य तज्जाय**" मित्यादि, गुरुणा च स मन्दप्रज्ञः शिष्य उक्तः—तज्जाएणेत्यादिश्लोको द्वयोरपि मयैकरूपतया व्याख्यातः, स्वप्रज्ञादोषात्तु न तव सम्यक् परिणत इति कोऽत्र मम दोष इति। '**अत्थसत्थे—कप्पओ दहिकुंडउच्छुकलावस्से**'त्यादि (१५३-५), अर्थशास्त्रं—नीतिशास्त्रं तत्प्रावीण्ये कल्पको दृष्टान्तः, कथानकं चेदमुपरिष्टाद्योगसङ्ग्रहेषु न्यक्षेण वक्ष्यते, स्थानाशून्यार्थं च लेशतः किञ्चिदुच्यते—पाटलीपुत्रनगरे नन्दाभिधानेन राज्ञा कल्पकाभिधानो निजामात्यः कस्मिंश्चिदपराधे सकुटुम्बोऽन्धकूपे प्रक्षिप्तः, तद्भोजनार्थं च कोद्रवकूरभृतशरावकं पानीयं च किञ्चित्प्रक्षिप्यते, तच्चाल्पमिति वैरनिर्यातनार्थं जिजीविषुः कल्पक एवैको भुङ्क्ते न शेषाणीति कल्पकवर्ज्जं सर्व्वाण्यपि मृतानि, नन्दश्च कल्पकबुद्धिबलेनैव राज्यमकरोद्, अतस्तमन्धकूपे क्षिप्तं मत्वा समस्तप्रतिपक्षराजवर्गेण पाटलीपुत्रे वेष्टिते नन्दः कल्पकं स्मृतवान्, कथितं च तत्पुरुषैः—देव! तत्र कूपे प्रक्षिप्तं भक्तमद्यापि कश्चिद्दाति, ततः कूपादाकृष्य कल्पकः सप्रणयं राज्ञाऽभ्यर्थितो—न भवद्बुद्धिमन्तरेणापदियं निस्तीर्यते तस्मात् कुरुष्व किञ्चिदुपायं, अतः कल्पकेनात्मीयपुरुषान्

प्रेष्य नदीपरतटावासितसमस्तप्रतिपक्षराजवर्ग्गस्याख्यापितं—अर्वागभागान्नावमारुह्याहमागमिष्यामि परतस्त्वात्मीयमन्त्रिणः प्रेषणीया येन नदीमध्ये सन्धानमुच्यते, समायातास्तथैव, कल्पकेनोक्तं—इक्षुकलापकस्य मुष्टिबद्धस्याधस्तादुपरि च छिन्नस्य मध्ये किं भवति ? कुण्डे प्रक्षिप्तदध्नो वाऽधउपरिच्छिन्नस्य मध्ये किं भवति ?, इत्येवमसम्बद्धं जल्पं किञ्चिद्विधाय प्रतिनिवृत्तः, तैश्च मन्त्रिभिर्गत्वाऽऽत्मीयस्वामिभ्यो निवेदितं, ते च राजानश्चिन्तयन्ति—नेत्थमसम्बद्धं कल्पको जल्पति कदाचिदपि, परमस्मदीया मन्त्रिणस्सर्व्वेऽपि तेन भेदिताः, सम्भवति हि सर्व्वं तत्पार्श्वे सकलबुद्धिसम्पन्नत्वाद्, यदिवाऽसौ जीवतीत्यस्माभिर्ज्ञातमभविष्यत् तदा विग्रहमपि नन्देन समं न कश्चिदकरिष्यत्, तस्मादिदानीमप्यपसरणमेव श्रेय इत्येवं विमृश्य सर्व्वे प्रनष्टाः, इत्येवं कल्पकस्य नीतिशास्त्रे प्रावीण्यमिति । '**लेहे जहा अट्ठारसे**' त्यादि (१५४-१), यः किल लाटकर्ण्णाटद्रविडदेशजादिलिपीनामष्टादशकमपि वेत्ति तस्य वैनयिकी, अथवा कश्चिदुपाध्यायो राजपुत्रान् पाठयति, ते च दुर्ललितत्वाल्लाक्षागोलकैः क्रीडन्ति न पुनरधीयते, अत उपाध्यायेन स्वबुद्धिप्रकर्षात्तथैव क्रीडन्तोऽप्यमी यथा २ अक्षराण्येकद्वित्र्याद्यङ्कांश्च निष्पाद्यन्ते तथा २ भूमौ गोलकप्रक्षेपं कारयित्वा समस्तलिपीर्गणितञ्च ग्राहिताः न च क्रीडारसस्तेषां निरुद्ध इत्युपाध्यायस्य वैनयिकी । '**खायजाणएणं भणिय**'मित्यादि (१५४-२), खातं—कूपवाप्यादि तत्स्वरूपज्ञायकेन केनचिन्नैमित्तिकेन केषाञ्चित्कूपखननप्रवृत्तपुरुषाणां कथितम्, एतावद्दूरमवनौ खातायामत्र जलमुन्मीलयिष्यति, तैस्तावत्समधिकं खातं तथापि जलं न प्रादुरस्ति, ततौ नैमित्तिकाय तैराख्यातं—अतिक्रान्तं भवत्कथितं स्थानं तथापि न पानीयमुन्मीलति, नैमित्तिकेन प्रत्यवाचि—यस्मिन्नेव प्रदेशे मया कथितं तस्मिन्नेव जलं केवलं तत्रैवैकस्मिन्पार्श्वे कूपतटं ताडयत यूयं थासकेन—कुद्दालकेनेत्यर्थः, तथैव तैरनुष्ठितम्, उद्भूतं च तोयमिति नैमित्तिकस्य वैनयिकीत्येवं चूर्ण्यक्षराणि मन्तव्यानीति । '**अणेगआसावहो**'त्ति (१५५-१) अनेकानश्वानावहतीत्यनेकाश्वावहः, तेन गृहे तिष्ठतोऽन्येऽप्यश्वा बहवो भवन्तीत्यर्थः । गर्दभोदाहरणे—कश्चिद्राजा तरुणवयस एव पुरुषान् स्वसन्निधौ धारयति न वृद्धान्, अन्यदा च ससैन्यः कमपि शत्रुमनुधावितोऽसौ, अरण्ये च तोयमन्तरेण बाध्यमानायां सेनायामबहुदृष्टत्वेन तरुणपुरुषेषु जलस्थानान्यजानानेषु किमत्र कटके अस्ति कश्चिद्वृद्धो यो जलाशयान् जानीत इत्येवं राज्ञा पृष्टं, तत्र चैकेन पदातिना पितृभक्तेन राज्ञः प्रच्छन्नं स्वपिता वृद्ध आनीत आसीत्, तेन च पृष्टेन सता राज्ञः कथितं—यत्र किल खरश्चरणाघातान्प्रयच्छन् सादरं भूमिमाजिघ्रति तत्र स्वल्पेऽपि खाते जलमवाप्यते इति वृद्धश्रुतिः, तथैव च खानिते तस्य राज्ञस्तोयशिरादर्शनमभूद्, अन्ये त्वाचक्षते—येन मार्गेण तोयगन्धमाजिघ्रन्तो रासभा जग्मुस्तन्मार्ग्गमाश्रित्य नीतं समस्तमपि सैन्यं तेन वृद्धेन दृष्ट्वा जलाशय इति, वृद्धस्य वैनयिकीत्येवं चूर्ण्यक्षराण्युन्नेयानि । '**लक्षणोदाहरणं**' (१५५-

४–लक्खणे वृ०), पारसविषये कस्यचिद्गृहे प्रभूतास्तुरङ्गमाः, तेन चाश्वस्वामिना एतावदश्वसमूहमध्ये स्वेच्छयाऽश्वद्वयं त्वया भृतौ वर्षान्ते ग्राह्यमित्युक्त्वा कश्चिदश्वरक्षको धृतः, तस्य च तदुहित्रा सार्द्धं सङ्गतिरभूद्, वृत्तिकाले च समायाते अश्वरक्षकेन सा तदुहिता पृष्टा–अमीषां मध्ये कथय किमपि लक्षणयुक्तमश्वद्वयं येन तद्गृह्णामि, तयाऽभिहितोऽसौ–सर्वेष्वश्वेषु अरण्ये विश्रब्धमुपविष्टेषु घोलचर्म्मः–चर्ममयाधारविशेषः स पाषाणखण्डानां भृत्वा उपरिष्टाद्वृक्षशाखातो मोक्तव्यः तथा पटहस्तदग्रतो वादनीयः इत्येवं कृते यौ न समुत्त्रस्यतस्तथा खुक्खुरकेण–चर्म्ममयेन पाषाणखण्डभृतेन पृष्ठतो वाद्यमानेन सर्वानपि वाहय यौ शेषाश्ववाहनिकातोऽधिकं निर्वहतः तौ द्वावपि गृहाण, तेन सर्वं तथैव कृत्वा वेतनकाले–मूल्यकाले अश्वस्वामी याचितो–ममामुकममुकं चाश्वं देहि, तुरङ्गमस्वामी तु समस्तलक्षणयुक्तौ तावितीकृत्वाऽऽह–एतद्वर्ज्जं शेषान् सर्व्वानपि गृहाण किमेताभ्यां करिष्यसि?, स तु तद्वर्ज्जं नापरं कमप्यश्वमिच्छति, ततश्चाश्वस्वामिना स्वभार्योक्ता–प्रदीयतामस्मै स्वपुत्रिका येन गृहजामातृत्वं प्रतिपन्नो नाश्वौ गृहीत्वाऽन्यत्र व्रजति, सा च हीनोऽसाविति नेच्छत्यमुमर्थं, ततोऽश्वस्वामी भार्याऽवबोधाय वर्द्धकिसुतं दृष्टान्तीकरोति, किमर्थमाश्रित्येति चेद् उच्यते–लक्षणयुक्तेन स्वगृहे धृतेन कुटुम्बं धनकनकादिना वर्द्धत इति, साम्प्रतं स एव दृष्टान्तो भाव्यते–एकस्य कस्यचिद् भागिनेयस्य मातुलकेन वर्द्धकिना स्वदुहिता परिणेतुं दत्ता, गृहजामाता च कृतः, कर्म्मान्तरं त्वसौ न किञ्चित्करोति, अतो वर्द्धकिदुहित्रा प्रेरितः किमिति पुरुषव्रतरहितं परदत्तमुपजीवंस्तिष्ठसि ? विधेहि किञ्चित्कर्मान्तरमिति, कुठारं गृहीत्वा काष्ठकर्त्तनार्थमटवीं गतः, स्वाभिलषितकाष्ठप्राप्त्यभावाच्च प्रतिदिवसं रिक्त एव निवर्त्तते, षष्ठे च मासे लब्धं कृष्णचित्रककाष्ठं, तत्र च कुलकः–कलशिकाचतुर्थांशरूपो धान्यमापकविशेषो घटितः, तद्विक्रयार्थं च द्रव्यस्य लक्षेण देय इत्युक्त्वा स्वभार्याऽऽपणपथे प्रेषिता, सा च तन्मूल्ये लक्षं याचमाना लोकैरुपहस्यते, अपरस्तु बुद्धिमान् वणिक्कश्चित् कारणेनेह भवितव्यमिति विमृश्य यावत्तेन धान्यं मिमीते तावन्न कथञ्चित्क्षीयते अतो धान्याद्यक्षयनिमित्तं लक्षमपि दत्त्वा तेन गृहीतः, ततः प्रभृति तेन सलक्षणजामातृकेन गृहे धृतेन सर्व्वमपि वर्द्धकिकुटुम्बं धनधान्यादिना वृद्धिमुपययौ, तथा त्वमपि निजदुहितरं यद्यस्मै प्रयच्छसि तदाऽनेनास्मद्गृहे तिष्ठता समस्तलक्षणोपेतमश्वद्वयमपि तिष्ठति, तदश्वद्वयमाहात्म्येन च सर्व्वाः सम्पदः करस्था एव भवन्ति अस्माकमित्यादि बहुविधमुक्त्वा दापिता तस्मै दुहितेत्यत्र अश्वाधिपतेर्वैनयिकीत्येवं सभावार्था चूर्ण्यक्षरगमनिका। '**तेणसीवणीए**'त्ति (१५७-६) तस्करसीवनिकया नष्टसीवन्येतियावत्। किमिति तेन वैद्येन स्तोकं विषमानीतमित्याशङ्क्याह–'**जं किं बहुणे**'त्यादि (१५८-४), यद्–यस्मात्कारणात् किं निस्सारेण वस्तुना विषेणान्येन वा बहुनाऽपि क्रियते ? प्रतिपक्षदर्शनेनापि निस्सारेण किं बहुना ? अपि तु प्रतिपक्षोऽपि सार एव प्रदर्शनीयः स्वल्पोऽपि, यथा तेन वैद्येन

विषप्रतिपक्षः स कश्चित्प्रधानः स्वल्पोऽप्यगदो दर्शितो येन शतसहस्रजन्तुवेध्यपि विषं झगित्येव निवर्त्तितं, तस्मान्न स्वल्पं बहु वा वस्तु चिन्तनीयं, किन्तु विवक्षितस्य वस्तुनो य आयो लाभो निष्पत्तिरितियावत् तदुपाये यत्कुशलत्वं तस्यैव दर्शनं–प्रकटनं कर्त्तव्यं, एतदुक्तं भवति–किमल्पबहुत्वविचारेण ? येनैव विवक्षितकार्यनिष्पत्तिस्तत्रैव यत्नो विधेय इति भावार्थः । '**सुक्किय भणंति अहो सीया साडी**' त्यादि (१६०-५), शुष्कामपि–अनार्द्रामपि स्नानशाटिकां ते कुमाराः शीतलामपि व्यपदिष्टवन्तः, तृणं च द्वाराभिमुखं कृत्वा व्यपदिशन्ति अहो सुदीर्घमिदं, क्रौञ्चनामा जीवविशेषः, स किल शेषदिवसेषु स्नानावसाने मङ्गलार्थमुपाध्यायस्य प्रदक्षिणीकृत्याऽऽरात्रिकवदवतार्यते तत्र च दिवसे विपर्ययेणावतारितः, एवं कुमारैरनुष्ठितेऽवगतमुपाध्यायेन–कथमिति? चेद् उच्यते–शीतला शाटिकेति ब्रुवाणैः कुमारैः स्वमातापित्रादीनि मां प्रति शीतलानि–विरक्तानीति सूचितं, दीर्घतृणदर्शनेन च मम पलायनार्थं दीर्घः पन्थाः प्रदर्शितः, कौञ्चविपरीत्यावतारणेन तु मरणमावेदितं मम, तथा चाह–'**सीयाणं**'ति (१६०-७) श्मशानसात्कर्त्तुं मृगयन्ति–मारयितुमिच्छन्तीत्यर्थः, वैपरीत्येन हि क्रौञ्चवतारणादिकृत्यानि किल मृतस्यैव क्रियन्ते न जीवत इति निश्चित्य प्रपलाययामास उपाध्याय इति, कुमाराणां तथा सूचयतां उपाध्यायस्यापि तथैव निश्चिन्वतो वैनयिकी । '**नीव्रोदकोदाहरणं**' (१६१-१), काचिद्वणिग्जाया चिरप्रोषिते स्वभर्त्तरि मन्मथव्यथितान्तःकरणा दास्याः सद्भावमाख्यातवती–समानय कञ्चिदुपपतिं, न शक्नोमि सोढुमब्रह्मनिरोधमिति, तयाऽपि कश्चिदन्विष्य समानीतः, स च नखप्रक्षालनाद्यावश्यकम्–अवश्यंकरणीयतारूपं कारितो रात्रौ च गृहं प्रवेशितः, स च पानीयं पातुमिच्छंस्तदेव प्रत्यासन्नं प्राप्तं नासीद्वाऽन्यज्जलमित्यादिकुतश्चित्कारणात् नीव्रोदकं पायितः, तच्च किलोदकं नीव्रमध्यवर्त्तित्वग्विषसर्प्पशरीरं स्पृष्ट्वाऽधस्तान्निपपात, विषदिग्धजलपानाच्च मृतोऽसौ, तया च वणिग्दयितया रात्रावेव नगरबहिर्वर्त्तिदेवकुलिकायां त्याजितः, तं चाभिनवप्रक्षालितनखं दृष्ट्वा नगरामात्येन नापिताः सर्व्वेऽप्याकार्योक्ताः–केन भवतां मध्येऽस्य नखाः प्रक्षालिताः ? कस्मिन् वा देशे स्थितस्येत्याद्यापृष्टे तन्मध्यादेकेन जगदे–अमुकवणिग्दासीवचनात्सर्वमावश्यकमिदं मया कृतं, अतः सा दासी राजपुरुषैः प्रहता, तया च वणिग्भार्या निरदेशि, सा चामात्येनाकार्य पृष्टा–किमिदं ?, तया कथितं–न जानामि किञ्चित्, केवलं नीव्रोदकं पीतमनेन निशायां, अतो निश्चितममात्येन–भवितव्यं नीव्रेषु विषधरेण एतन्मरणान्यथानुपपत्तेः, प्रलोकितो नीव्रप्रदेशो दृष्टश्च त्वग्विषसर्प्प इत्येष चूर्ण्यक्षरभावार्थः । '**गौणे'त्याद्युदाहरणं** (१६१-५), कश्चिदकृतपुण्यो यं यं व्यवसायमारभते स स विपद्यते, ततो मित्राद् याचितबलीवर्द्दैः सकलं दिवसं हलं वाहयति रात्रौ पुनः समर्प्पयति, अन्यदा तु सन्ध्यायां तत्समर्प्पणार्थमायातो मित्रं च भुञ्जानं दृष्ट्वा लज्जया

न समीपमायातः केवलं तस्य पश्यतस्तदीयवाटके प्रक्षिप्ता बलीवर्दाः, तेन च मित्रेण न सङ्गोपितास्ततो वाटकान्निर्गतास्तस्करैश्चापहृताः, ततोऽसौ अकृतपुण्यस्यैव पार्श्वे याचितवान्, स तु प्राह—मया तव पश्यत एव मुक्ता इति कोऽत्र मम दोष इति ?, एवं विवादे द्वावपि राजधानीं प्रति गन्तुं प्रवृत्तौ, मार्गे चाश्वात्पतितेन केनचिद् अकृतपुण्यः पुमानुक्तः—एनं प्रपलायमानमश्वं व्यावर्त्तय, तथैव तेन कृते मर्माहतोऽश्वो मृतः तेनाप्यसौ गृहीतः, एवं त्रयोऽपि जना राजधान्या बहिस्ताद्वटवृक्षस्याधस्ताद्रात्रावुषिताः, अपरेऽपि लोमन्थिकाः—नटास्तत्रैवोषिताः, अकृतपुण्यपुरुषेण चानयोर्यावज्जीवं दासोऽहं भविष्यामीति विचन्त्य वटवृक्षे दण्डीखण्डेनोल्लम्बितं, त्रुटिते च तस्मिन्नधोवर्त्तिनटमहत्तरो निपतता व्यापादितो, अतस्तैरपि नटैः प्रारब्धोऽसौ, ततः सर्वैरपि यथावृत्तव्यतिकरेऽमात्यस्य कथिते तमकृतपुण्यपुरुषं निष्प्रतिभं दीनवदनमनुकम्पास्पदं दृष्ट्वा कृपया सञ्जातत्पक्षपातो निजगाद सचिवो—ददात्येष बलीवर्दान् केवलं यैर्मुच्यमाना वाटके बलीवर्दा दृष्टास्तानि बलीवर्दस्वामिनो नेत्राणि उत्खातयामि, अश्वस्वामिनो यया जिह्वयेदमुक्तं—निवर्त्तयैनमश्वं तामुत्पाटयामि ततो दास्यत्यश्वमसौ, नटास्त्वभिहिताः, तस्यैव वटवृक्षस्याधस्तादयं शेते भवतां मध्यात्कश्चिदुल्लम्बयतु इत्येवमभिहितास्तं परित्यज्य सर्व्वे प्रणष्टा इति चूर्ण्यक्षरभावार्थः। '**डोवदृष्टान्तो**' (१६५-१), यथा काचित्परिवेशनकर्त्री प्रथममेव जानाति एष एतावन्मात्रया दीयमानः सर्वेषामेकस्मिन्माने भविष्यति अतस्तावन्मात्रं २ डोवैः कृत्वा ददातीत्यर्थः। '**मौक्तिकदृष्टान्तो**' (१६५-१), यथा कश्चिन्मौक्तिकानि शूकरवाले प्रोतयंस्तथाऽऽकाशे मौक्तिकमुल्लालयति यथा शूकरवालमुखेन तच्छिद्रं संयुज्यत इति। '**पवउ**'त्ति (१६५-२, प्लवको—नट इतियावत्। तुन्नाकः अभ्यासोत्तरकालं पश्चादतिसूक्ष्माणि तूनयति यथा श्रीमन्महावीरसम्बन्धि वस्त्रं धिग्जातीयेन तुन्नाकसकाशात् तथा तुन्नापितं यथा न केनचिल्लक्षितं, शून्या च तुन्नाको निरीक्ष्य कश्चित्तावन्मात्रं दवरकं गृह्णाति यावता विवक्षितवस्त्रच्छिद्रं पूर्यते न हीनाधिकमिति। '**पज्जोओ रायगिह**'मित्यादि—(१६८-८), चण्डप्रद्योतो राजा राजगृहमवरुणद्धि तदावासभूमौ च प्रथममेव निधानानि स्वयमेव निक्षेप्याभयकुमारेण पश्चाद्भेदयित्वा तदीयस्कन्धावारनिवेशज्ञायकपुरुषपार्श्वादाख्यापितं चण्डप्रद्योतस्य—त्वदीयसामन्ताः सर्वेऽपि श्रेणिकेन भेदिताः, अन्यथा शोध्यन्तां तदीयावासभूमयो यदि श्रेणिकप्रयुक्तनिधानानि न लभ्यन्त इति, तद्वचः श्रुत्वा प्रपलानश्चण्डप्रद्योत इत्यभयस्य पारिणामिकी। '**मुहमक्कडियाहि**'त्ति (१७३-१) यासु वचनोक्तिषु करमुत्क्षिप्योत्क्षिप्यासभ्यवाक्यैः परो धृष्यते ता मुखमर्क्कटिकास्ताभिर्वेलबिता—अपमानिता। '**उववासं करेइ**'त्ति (१७३-४), स उदितोदयो राजा वैश्रमणाराधनायोपवासं चक्रे, वैश्रमणेनापि तदीयश्रावकत्वपरितोषितमानसेन धर्मरुचिराजः संहृत्य स्वनगरे वाणारसीलक्षणे प्रक्षिप्तः। '**सल्लीवइस्स**'त्ति (१८२-४), शल्लकीपतिरिति नन्दस्य बिरुदमिदं।

'**पाओ पढमो उक्खित्तो**'ति (१८२-८), प्रथमः प्रतिज्ञाश्लोकः उत्क्षिप्तश्चेतसा अन्यदा तु तमेव प्रकटं पठितवान् ''कोशेन भृत्यैश्चे''त्यादि । '**इमो य उपस्पृशती**'त्यादि (१८४-३), चन्द्रगुप्तः पद्मसरसि प्रवेशितः स्वयं तु चाणक्यस्तत्तीरे देवार्च्चनं करोति, तत्र च किल मौनेनाहं देवतामर्च्चयामीति ख्यापयन् केनचिन्नन्दपुरुषेण चन्द्रगुप्तः पृष्टः सन् शिरश्चलनसंज्ञयैव कथयत्यग्रतोऽसाविति '**आणाए वंसीहि अंबगे**'त्यादि (१८७-२), इह किलैकस्मिन् ग्रामे भिक्षाटनं कुर्व्वता पूर्व्वं चाणक्येन भिक्षा न लब्धाऽऽसीद् अतः प्रत्यपकारं करोमीति क्षुद्रादेशस्तद्ग्रामेयकानां दत्तो यथा चूतान् कर्त्तयित्वा वंशजालीनां वृत्तिर्विधेया, ग्रामेयकैः पुनर्न कश्चनापि वंशानां चूतैर्वृत्तिं कारयति ततो लेखकदोषादेवायं व्यत्ययोऽभूदिति विमृश्य वंशैश्चूतानां वृत्तिः कृता, अतो मदीयं वचोऽमीभिरन्यथा कृतमिति तमेव दोषमुद्भाव्य चाणक्येन सर्व्वोऽपि ग्रामो दाहं प्रापित इति भावार्थः । '**इयंपाउयाउ**'त्ति– (१९४-६–इंदपाउ वृ०), या पूर्व्वमिन्द्रकुमारिका इत्युक्ताः चाणक्येन नगरात्स्वबुद्धया निष्कासितास्ता एव नामान्तरत इन्द्रपादुका इतीहावगन्तव्या इति उक्तो बुद्धिविचारः ॥ '**न तु शुभस्य स्वरूपस्यैवे**'ति (२००-२), एवम्भूतस्यैवाशुभरूपस्य संसारानुबन्धिनः कर्म्मण एव क्षयो युज्यते न तु यथा सर्व्वथा सन्तानोच्छेदवादिभिः सौगतैः '**दिशं न काञ्चिदि**'त्यादिवचनतः शुभस्य जीवस्वरूपस्याप्युच्छेदोऽभ्युपगम्यत इत्यत्राभिप्राय इति । '**स हि योगनिरोधं कुर्व्वन् प्रथममेव**'त्यादि (२०५-३), स हि भगवान् केवली योगत्रयनिरोधं चिकीर्षुर्विषमिव मन्त्रेण प्रथममेव तावत्तव्यापारं निरुणद्धीति सम्बन्धः, तस्या–मनःपर्याप्तिनिर्वृत्तेः शरीरसव्यपेक्षजीवस्य मनोद्रव्यग्रहणशक्तिरूपाया योऽसौ बाह्यघटादिवस्तुचिन्तनरूपो व्यापारः प्रथमं तावत् तं निरुणद्धीत्यर्थः, केन कृत्वेत्याह– '**अनुत्तरेणे**'त्यादि (२०५-५), अनुत्तरादिविशेषणविशिष्टं किल सिद्धानामपि वीर्यं भवति तव्यवच्छेदार्थमुक्तं–करणवीर्येण–शरीरजवीर्येणेत्यर्थः, तस्या व्यापारं निरुणद्धि, या किमित्याह– '**याऽसौ शरीरे**'–त्यादि, पुनस्तामेव विशेषयति–'**यथा पूर्व्व**'मित्यादि, किमर्थं पुनस्तव्यापारं निरुणद्धीत्याह–तस्या–मनःपर्याप्तिनिर्वृत्तेर्यत्कारणभूतं कर्म्म तेन जीवस्य यः संयोगस्तद्विघटनाय, न ह्यविकले तत्कारणभूते मनःपर्याप्तिनामकर्मणि तत्कार्यभूताया मनोद्रव्यग्रहणशक्तेर्निरोधः शक्यः कर्त्तुमिति भावः । '**निरुध्य चे**'ति, मनोव्यापारं उपलक्षणत्वाद्, वाक्कायव्यापारं च निरुध्य ततः शैलेशीभावनामेतीति सम्बन्धः, अथ मनोव्यापारादिनिरोधे कः क्रम इत्याह–'**पज्जत्तमित्ते**'त्यादि (२०५-६), व्याख्या–पर्याप्तिसमर्थनोत्तरकालमेव जघन्ययोगिनः संज्ञिनो यावन्ति मनोद्रव्याणि–चित्तावष्टम्भकमनोवर्गणादलिकानि तव्यापारश्च–मनोद्रव्यव्यापारश्च चिन्तनीयानुकूलचेष्टालक्षणो वा यावान् भवति केवलिनोऽपि शैलेश्यवस्थाप्राप्तिसमये तावन्ति मनोद्रव्याणि तद्व्यापारश्च तावानेव भवति, इदमुक्तं भवति–शैलेशीमारुरुक्षुः केवली प्रथममेवाचिन्त्यसामर्थ्यवीर्य्यविशेषाज्झगित्येव

पर्याप्तमात्रजघन्ययोगिसंज्ञिपञ्चेन्द्रियमनोयोगतुल्यं मनोयोगं धरति, ततश्च तस्मादवशिष्यमाणमनोयोगाद् असंख्येयगुणविहीनं प्रतिसमयं निरुन्धानोऽसंख्येयसमयैः सर्वमपि मनोयोगं निरुणद्धि, अवशिष्यमाणमनोयोगात्प्रतिसमयमसंख्येयं २ भागमपनयन्नसंख्येयसमयैः सर्वमपि मनोयोगंनिरुणद्धीत्यर्थः इति गाथाद्वयार्थः । एवं वाग्योगमपि विशिष्टवीर्यविशेषात्पर्याप्तमात्रद्वीन्द्रियजघन्यवाग्योगतुल्यं प्रथममेव विधृत्य, तथा काययोगमपि प्रथमसमयोत्पन्नसूक्ष्मपनकजघन्यकाययोगतुल्यं विधृत्य ततस्तदसङ्ख्येयगुणविहीनं प्रतिसमयं निरुन्धानोऽसंङ्ख्येयसमयैः सर्वं वाग्योगं देहित्रिभागं च मुञ्चन् सर्वं काययोगं निरुणद्धि, निरुद्धय च शैलेशीं प्रतिपद्यत इति गाथाचतुष्टयतात्पर्यार्थः । अन्ये त्वन्यथापि व्याचक्षते, प्रज्ञापनादिभिर्विसंवादित्वाच्च तन्नेह प्रदर्श्यत इत्यलं प्रसङ्गेनेति । '**तदानन्तर्यवृत्तिरेव प्रतिस्खलन**'मित्यादि (२११-१), तस्य–अलोकाकाशस्यानन्तर्येण–अव्यवहितत्वेन या वृत्तिः–अवस्थितिः सैवालोकेन सिद्धानां प्रतिस्खलनं न पुनर्दृष्ट्यादेरिव स्तम्भादिना सार्द्धं सम्बन्धे सति प्रतिघातः सम्बन्धस्यैवानुपपत्तेः, तथाहि–एकैकस्य जीवप्रदेशस्यैकैकेनालोकाकाशप्रदेशेन सह सम्बन्धो भवन् सर्व्वात्मना वा भवेत् देशात्मना वा ?, यदि सर्वात्मनेति पक्षस्तदा जीवप्रदेशस्य सर्वात्मनाऽऽकाशप्रदेशेन सम्बद्धत्वादेकत्वप्रसङ्गः, अथ देशात्मनेति पक्षः, तदा प्रदेशेष्वपि प्रदेशप्रसक्तिः, तदयुक्तं, यदाह–'प्रदेशानां निष्प्रदेशत्वा'दिति न हि प्रदेशेष्वपि प्रदेशाः सन्ति इत्येवं पक्षद्वयेऽपि सम्बन्धाभावात् तदानन्तर्यवृत्तिरेव प्रतिस्खलनमित्येवं सभावार्थमिदं व्याख्येयम्, अत एवोक्तं–'सूक्ष्मधिया भावनीय'मिति । '**गंतूण जोअणं जोयणं तु परिहाइ अंगुलपुहुत्त**'मिति (२१३-१२), अत्राङ्गुलपृथक्त्वं जिज्ञासुना त्रैराशिकमनुसरणीयं, तत्रेयं करणकारिका–"आद्यन्तयोस्त्रिराशावभिन्नजातीप्रमाणमित्सा च । फलमस्य जातिमध्ये तदन्त्यगुणमादिमेन भजेत् ॥१॥" भावना त्वियम्–अत्र सार्द्धद्वाविंशतियोजनलक्षाणि गत्वा यद्यष्टौ योजनानि हीयन्ते तदैकस्मिन् योजने किं परिहीयते ?,स्थापना—२२५०००० / ८ / १ अत्र चान्त्येनैककेन मध्यवर्त्तिनो अष्टौ गुणितास्तावन्त एव भवन्ति एतानि चाष्टौ योजनान्याद्यराशिना विभक्तव्यानि न च भागं प्रयच्छन्ति अतोऽङ्गुलानि क्रियन्ते, तत्रैकस्मिन् योजने अष्टषष्टिसहस्राधिकसप्तलक्षाण्य-ङ्गुलानां भवन्ति अतोऽष्टसु योजनेष्वयमङ्गुलराशिर्भवति ६१४४०००, अस्य राशेः सार्द्धद्वाविंशतिलक्षस्वरूपाद्यराशिना भागेऽपहृते किञ्चिन्यूनमङ्गुलत्रयं लभ्यते तदेव चेहाङ्गुलपृथक्त्वशब्देनोक्तं द्रष्टव्यमिति, इदं चेहाविशेषेणोक्तत्वादित्थं व्याख्यायते यावता प्रज्ञापनायां द्वितीयस्थानपदे मध्यभागवर्त्त्यष्टयोजनेषु हानिर्निषिद्धैव अतस्तन्मतेन मध्यभागाष्टयोजनवर्ज्जा शेषक्षेत्रस्य हानिर्द्रष्टव्येति। '**पृष्ठतोऽर्द्धावनतादि**'रिति (२१५-४),आदिशब्दाद्धून्यस्तपृष्ठस्योत्तानस्य परिग्रहः निषण्णश्चोपविष्ट उच्यते । उत्कृष्टापि पञ्चधनुःशतेभ्यस्त्रिभागे पातिते सति सत्रिभागत्रयस्त्रिंशदधिकधनुःशतत्रयमानैव

सिद्धानामवगाहना भवतीति। '**किह मरु देवी**त्यादि गाथा (२१७-५), यद्युत्कृष्टतोऽपि पञ्चधनुश्शतमान एव सिध्यति नाधिकमानः तत्कथं मरुदेव्या मानं पञ्चविंशत्यधिकपञ्चधनुःशतलक्षणमुपपन्नं स्याद् ?, आचार्य आह—नाभेः कुलकरात्सकाशाद् येन किञ्चिन्न्यूनासौ ज्ञातव्या, एतदुक्तं भवति—यद्यपि पञ्चविंशत्यधिकं पञ्च धनुःशतानि नाभेः शरीरप्रमाणं तथा मरुदेव्या अपि "संघयणं संठाणं उच्चत्तं चेव कुलयरेहिं सम" मित्यतिदेशात्तदेव प्राप्नोति तथापि पञ्चधनुःशतमानैवासौ, सूत्रे हि कियन्मात्रेण हीनाधिकेऽपि लाघवार्थमनेकस्थानेषु दृश्यन्ते एवातिदेशा इति भावः, अथवा भवतु नाभिशरीरप्रमाणा तथापि करिस्कन्धावरूढत्वात्सङ्कुचितगात्रा सिद्धेति न यथोक्तावगाहनाविरोध इति **गाथार्थः** । जघन्यावगाहनाया विप्रतिपत्तिमाविष्कुर्वन्नाह परः—'**सत्तूसिएसु**'इत्यादि (२१७-७), ननु प्रज्ञापनादिग्रन्थेषु जघन्यपदेऽपि सप्तहस्तोच्छ्रितस्यैव सिद्धिरुक्ता अतः कथमिह जघन्यतो द्विहस्तशरीरमानस्य मुक्तिरुच्यमाना न विरुध्यते ?, एवं परेणोक्ते पश्चार्द्धेनोत्तरमाह—'**किले**'ति वृद्धवादसूचायां, एवं किल वृद्धा व्याचक्षते—सा प्रज्ञापनाद्युक्ता सप्तहस्तप्रमाणा जघन्यावगाहना तीर्थकृतामेव द्रष्टव्या, जघन्यपदेऽपि तीर्थकरः सप्तहस्तमान एव सिद्ध्यतीत्येवंविषयैवेतिभावः, तीर्थकरव्यतिरेकेण तु शेषजीवानां सिद्ध्यतां—सिद्धिमासादयतां जघन्यपदे याऽत्रोक्ता द्विहस्तप्रमाणाऽवगाहना सैव द्रष्टव्येति वाक्यशेष इति **गाथार्थः**, के पुनस्ते ये द्विहस्ताः सिद्धा इत्याह—'**ते पुणे**'त्यादि (२१७-८), ते पुनर्जघन्येन द्विहस्तप्रमाणाः कूर्म्मपुत्रादयः सिद्धा भवेयुः, अन्ये पुनरभिदधति—सप्तहस्तप्रमाण एव यो मयूरबन्धादिना संवर्त्त्य बद्धो यन्त्रे वा निपीड्यमानः सङ्कुचितो द्विहस्तीभूतः सन् सिद्धयति तस्यैव जघन्या द्विहस्तप्रमाणावगाहना प्राप्यते न पुनः स्वरूपतोऽपि कश्चिद् द्विहस्तः सिद्ध्यतीति **गाथार्थः**, किञ्च प्रायोवृत्तिमाश्रित्य जघन्यतः सप्तहस्ता उत्कृष्टतस्तु पञ्चधनुःशतानि सूत्रे मानमुक्तं इतरथा हीनमप्यधिकं वा कियताऽपि कस्यचित्स्यादेवेत्याह—'**बाहुल्लओ य**'इत्यादि (२१८-१), बाहुल्यमाश्रित्य सूत्रे सप्त हस्ता जघन्यं पञ्चधनुःशतानि चोत्कृष्टं मानमुक्तम्, इतरथा कस्यचिज्जीवस्याङ्गुलपृथक्त्वैः कैश्चिज्जघन्यं सप्तहस्तलक्षणं मानं हीनमपि स्याद्, उत्कृष्टमपि पञ्चधनुश्शतलक्षणं मानमभ्यधिकमपि कैश्चिद् धनुःपृथक्त्वैर्भवेदिति यथा-सङ्ख्यं सम्बन्धः, ततश्च यद्यपि कैश्चिद्धनुःपृथक्त्वैर्मरुदेव्याः शररीमानमभ्यधिकं तथापि न कश्चिद्दोष इति **गाथार्थः**, किञ्च—सप्तहस्तमानादधस्तात् पञ्चधनुश्शतेभ्यश्चोपरि वर्त्तमानस्य यत्कस्यचिज्जीवस्य सिद्धिगमनं तदाश्चर्यप्रायमिति यद्यपि सामान्यमुमुक्षुजीवशरीरमानप्रतिपादके सूत्रे न निबद्धं तथापि पञ्चशतादेशवचनवत्प्रमाणयितव्यमेव, न हि पञ्चशतान्यादेशानां क्वचित्सूत्रे निबद्धानि न च तानि न प्रमाणमिति, आह च—'**अच्छेरयादि**'इत्यादि, (२१८-२), गाथा व्याख्यातैव, नवरमाश्चर्यादीत्यादिशब्दात्प्रविरलजीवभावित्वादिपरिग्रहः । '**केनचित् प्रकारेण**

लौकिकेनास्थित'मिति (२१८-८), ननु यदिह संस्थानं तत् तत्रापि घनप्रदेशं सत् सिद्धानामनन्तरमेवोक्तं, तथाहि—*जं संठाणं तु इहं भवं चयंतस्स चरमसमयंमि। आसी अ पएसघणं तं संठाणं तहिं तस्स ॥१॥* इति (गा० ९६९) कथं न विरोध ? इति, नैवं, अभिप्रायापरिज्ञानाद्, यथा ह्यमूर्त्तत्वेन नभसः स्वत आकाराभावेऽपि चतुरस्रगृहद्वाराद्यर्थावच्छिन्नस्य तस्यापि परोपाधितश्चतुरस्राद्याकारता कल्प्यते तथा सिद्धानामपि प्रागौदारिकशरीरपरिच्छिन्नजीवप्रदेशापेक्षया परोपाधितः संस्थानमुच्यते न पुनस्तेषां स्वतः संस्थानमस्ति अमूर्त्तत्वात् संस्थानस्य च मूर्त्तवस्तुधर्म्मत्वादिति न कश्चिद्विरोध इति । '**सिद्धस्स सुहो रासी सद्यद्धापिंडिओ जइ हवेज्जा**'इत्यादि (२२३-५) गाथायां सर्व्वाद्धाशब्देन सादिरपर्यवसितः सिद्धसम्बन्ध्येव कालो गृह्यते न सामान्यः सर्वोऽपि कालः, तद्ग्रहणे हि वक्ष्यमाणमनन्तैर्वर्ग्गमूलैरपवर्त्तनमसङ्गतं स्याद्, यदि हि सर्व्वकालसमयराशिना गुणयित्वाऽपि पुनरपवर्त्तनीयो राशिः तर्हि तद्गुणनस्य किं फलं ?, सिद्धसम्बन्धिकालग्रहणे तु सर्व्वाद्धापिण्डित इति किमुक्तं भवति ?—सर्वेणापि साद्यपर्यवसितेन कालेन यत्सुखं सिद्धः प्रतिसमयमनुभवति तद् यद्येकत्र संपिण्ड्यासत्कल्पनया राशिः क्रियत इति, स च राशिरनन्तवर्ग्गापवर्त्तित इत्यनन्तैर्वर्ग्गमूलैस्तावदपवर्त्तितो यावत् सर्व्वाद्धालक्षणगुणकारेण यदधिकं जातमासीत् तस्य सर्व्वस्याप्यपवर्त्तनेन समीभूतः सिद्धत्वाद्यसमयमात्रभाविसुखरूपतां प्राप्त इत्यर्थः, एतावन्मात्रोऽपि सर्वाकाशे न माति सर्वस्तु दूरापास्त एवेति ज्ञापनार्थं च पिण्डयित्वा पुनरपवर्त्तनं सुखराशेरिति, एतदेव भावयति—'**इह किल विशिष्टे**' त्यादि (२२४-२), एतदुक्तं भवति—सर्व्वस्यापि सुखशब्दयवाच्स्याह्लादरूपस्य सुखस्य सिद्धसुखमेव परमप्रकर्षप्राप्तं भवति, तच्च केवलिप्रज्ञया परिच्छिद्यमानं यावतोऽंशान् प्रयच्छति तावतोऽंशाः सर्वलोकालोकाकाशप्रदेशेभ्योऽप्यादिशब्दात् तत्पर्यायेभ्योऽपि भूयांस इत्यनया किल कल्पनाविवक्षयोक्तं—'**सिद्धाण सुहो रासी सव्वागासे न माइज्जे**'त्यादि, अन्यथा यद्येवं विवक्षामनपेक्ष्य मुख्यरूपतयैव सिद्धसुखं सर्व्वाकाशे न मातीत्युच्येत तदा कथमिति सूरयोऽभिदधतीति सम्बन्धः, किं तदित्याह—नियत देशे—क्रोशषड्भागलक्षणे तेषां सिद्धानां अवस्थितिरिति, अयमभिप्रायो—यद्युक्तकल्पनाव्यतिरेकेण मुख्यवृत्त्यैव सिद्धस्य सुखराशिः सर्व्वाकाशे न मातीत्युच्येत तदा धर्मिणमन्तरेण धर्म्मस्याभावात् सिद्धोऽपि सर्व्वाकाशे न मातीति वक्तुं युक्तं स्यात् तत्कथं पूर्वसूरयः क्रोशषड्भाग एव सिद्धावस्थानमभिदध्युः तस्माद्यथोक्तविवक्षयैव ''सिद्धस्स सुहो रासी''त्यादि अभिहितमिति स्थितं, न चैतन्मया स्वमनीषिकयोच्यत इति दर्शयति—'**तथा चैतदि**'त्यादि (२२४-७), विद्यन्ते—ज्ञायन्ते जीवादय पदार्था अनेनेति व्युत्पत्त्या वेदशब्देनेह सिद्धान्तोऽभिधीयते, ततश्च गौतमादिमहर्षिप्रणीते सिद्धान्तेऽपि एतत्संवादि—मदीयव्याख्यानसंवादि स्थाने २ प्रोक्तमेवेत्युक्तं भवति येन च ग्रन्थेनोक्तं

स स्वयमेवोभ्यूह्यमिति । '**कुट्टिमादौ विचित्राणी**'त्यादि (२२७-२) श्लोकव्याख्या—कुट्टिमे—स्वच्छकान्तिभृन्मणिनिचयखचितभूतले आदिशब्दादादर्शगृहे च सङ्क्रान्तानि विचित्राणि—विशिष्टनानावेषधारीणि विलासवन्त्यत एव लोचनानन्ददायीनि स्वकीयरूपाणि निजशरीराणि दृष्ट्वा द्रष्टव्यकौतुकनिवृत्तेस्तत्रानुत्सुको भवतीति श्लोकार्थः । '**अम्बरे**'त्यादि (२२७-३), अम्बरशब्देनात्र मत्स्यमदोऽभिधीयते, स हि किलात्यन्तसुगन्धो भवति, शेषं सुगमम् । '**वस्तुतः सिद्धपर्याये**'त्यादि (२२८-५), यद्यपि सिद्धः कृतकृत्य उच्यते बुद्धस्त्ववगततत्त्व इत्यादिकं किञ्चिदभिधेयभेदं बिभ्रति वक्ष्यमाणशब्दाः तथापि वस्तुतः—परमार्थतः सिद्धपर्याया एव, एकस्मिन्नर्थे सर्वेषां वृत्तत्वादितिभावः। '**आदिशब्दाद्द्रव्यभूत आचार्य**' इत्यादि (२३०-३), यदा कश्चिल्लोकोत्तरदर्शनप्रपन्नोऽपि विशिष्टधर्म्मकथाद्याचार्यकार्याक्षमो दृश्यते तदैवं व्यपदेशः प्रवर्त्तते—द्रव्यभूतोऽयमाचार्यः, आचार्याभास इत्यर्थ इति । '**अन्ये त्वेवं भेदमकृत्वे**'त्यादि (२३०-६), अन्ये तु लौकिकलोकोत्तरभेदाद् भावाचार्यो द्विधेत्येवं न भेदं कुर्वते, किन्तु लौकिकः सर्वोऽपि द्रव्याचार्यपक्षेऽन्तर्भवतीत्यभिदधति। '**योगप्राधान्यख्यापनार्थ**'मिति (२३५-२), एतदुक्तं भवति—यद्यपि ''निव्वाणसाहए जोए'' इत्युक्ते सर्व्वभूतसमताऽपि लभ्यते तस्या अपि निर्व्वाणसाधकत्वात् तथापि निर्व्वाणसाधकयोगेषु मध्ये सर्व्वभूतसमतैव प्रधानं तदङ्गमित्येवं प्राधान्यख्यापनार्थं ''समा य सव्वभूएसु इत्यनेन तस्याः पृथगुपादानं कृतमिति । '**इहास्या गाथाया**' इत्यादि (२३६-८), इहास्या ''न संखेवो न वित्थारो'' इत्यादिगाथायाः सम्बन्धिना ''न संखेवो'' इत्यनेन पाठेन सह विरुध्यते, किं तदित्याह—लक्षणं, क्व यदुक्तं लक्षणमित्याह—छन्दोविचितिनाम्नि छन्दःशास्त्र इत्यर्थः कस्माद्विरुध्यत इत्याह—अंशक्रमनियमात्—छन्दःशास्त्रे ह्ययमंशकक्रमनियमोऽस्ति यदुत गाथायाः प्रथमांशकश्चतुर्मात्रो विधेयो यथा—''नमिऊण जिणवरिंदे'' इत्यादिगाथास्वाद्योऽंशकश्चतुर्मात्रो भवति तद्यथा—'नमिऊ' (१-१-२) अस्यां तु गाथायामाद्योऽंशकः पञ्चमात्रः प्राप्नोति तद्यथा—नसंखे (१-२-२) तस्मादिहैवं पाठो द्रष्टव्यो—नवि संखेवो इत्यादि, एवं च सति संपद्यन्ते चतस्रो मात्राः प्रथमांशे, तद्यथा—नविसं (१-१-२) न च वक्तव्यं पूरणार्थं एवायमपिशब्दो न पुनः सार्थको, यदाह—विद्यमानार्थो द्रष्टव्यो, विद्यमानार्थतां च समुच्चयलक्षणामनन्तरमेवास्य व्यवहितसम्बन्धं कृत्वा वृत्तिकार एव यतोऽत्र न संक्षेपो नापि विस्तर इत्यनेन स्वयमेव दर्शयिष्यति, अत्राह—ननु यद्यपीत्थमतिविज्ञतामवलम्ब्य भवद्भिः प्रथमोऽंशः शोधितः तथापीयं गाथा शेषेष्वप्यंशेषु नातीव लक्षणसंवादिनी दृश्यते तथा अन्या अपि गाथा न खल्वार्षीयाः सर्व्वा अपि लक्षणसंवादं बिभ्रति तत्किमनया चर्चया ?, सत्यमेवं मन्यते इह यत्र क्वचिदार्षे लक्षणविसंवादो दृश्यते स सर्वोऽपि वर्त्तमानप्राकृतलक्षणग्रन्थापेक्षया एव द्रष्टव्यः, चिरन्तनैस्तु लक्षणग्रन्थैः सर्व्वोऽपि संवदत्येव, प्रकृतगाथाप्रथमांशकस्तु तैरपि सह

न संवदतीति युक्तं चर्चितमिति । '**बाहिराहउ**'त्ति (२४३-८–विवहाराहओ वृ०), बहिर्हिण्डको व्यसनोपहत इतियावत् । '**सो संभंतो चिंतेती**'त्यादि (२४५-५), ततश्चानेन संभ्रान्तेन चिन्तितं–किमन्यान्येतानि पुष्पाणीति ?, सा च पृष्टा–कुतस्त्वया समानीतान्येतानि ?, तया कथितं–त्वया निरूपितघटाद्, अतस्तेन स्वयं गत्वा निरीक्षिते दृष्टो घटः पुष्पगतं च वृन्तपत्रादि किञ्चित् तत्रैव स्थितम् । '**अक्खपडिय**'त्ति (२४६-४), गोलकाकर्षणक्रमेण कृतवारकाः । नमस्कारनिर्युक्तिः समाप्ता।

सूत्रस्पर्शका निर्युक्तिरारभ्यते—'**साम्प्रतं सूत्रोपन्यासार्थ**'मित्यादि (२४९-५), सूत्रोपन्यासार्थं वस्तुतः सूत्रस्पर्शनिर्युक्तिगतामेव गाथामाहेति, ननु ''नंदिमणुओगे'' त्यादिगाथया न कश्चित्सूत्रावयवः स्पृश्यते तत्कथमियं सूत्रस्पर्शनिर्युक्तिगतेत्युच्यते ?, इत्याशंङ्क्याह—'**प्रत्यासत्तियोगादि**'ति, एतदुक्तं भवति, अनया गाथया सम्बन्धे घटितेऽनन्तरमेव सूत्रस्पर्शनिर्युक्तिर्भणिष्यत इति यद्यप्यनया न कश्चित्सूत्रावयवः स्पृश्यते तथापि सूत्रस्पर्शकनिर्युक्तेरत्यन्तं प्रत्यासन्नेति वस्तुतस्तदृतेत्युच्यते । '**अहीनाक्षरमनत्यक्षर**'मित्यादि (२५१-४), यद्यप्येतानि पदानि पूर्वं नन्द्यादौ व्याख्यातानि तथापि मन्दस्मृतिशिष्यानुग्रहाय लेशतो व्याख्यायन्ते–अहीनाक्षरं–यत्र हीनमक्षरं न भवति, अनत्यक्षरं–यत्राक्षरमधिकं न भवति, व्यत्यासितवर्णविन्यासं व्याविद्धाक्षरमुच्यते उत्क्रमप्रोतरत्नमालावत् न तथा अव्याविद्धाक्षरं, उपलशकलाकुलावनौ हलवद् यदधीयानः स्खलति तत् स्खलितं न तथाऽस्खलितमुच्यते, असदृशधान्यमीलकवद् यत्र वर्त्तते तदमिलितमिति आख्यायते, 'प्राप्तराज्यस्य रामस्य राक्षसा निधनं गता' इत्यादिवाक्यवद् यदस्थानविरतिमत्र भवति तदव्यत्याम्रेडितं, मात्रांशकादिनियतमानं प्रतिपूर्णं, उदात्तादिघोषसमन्वितं प्रतिपूर्णघोषं बालमूकभणितवद् यदव्यक्तं न भवति तत्कण्ठोष्ठविप्रमुक्तमुच्यते, वाचनोपगतं नाम यद् गुरुदत्तवाचनयाऽधीतं न पुनः स्वयमेव पुस्तकमादाय पठितमिति ॥ '**अथवा परः सन्निकर्ष**'इति (२५१-९), यो विसन्धिभावेनोच्चारणरूपः सन्निकर्षः स वा संहितेत्यर्थः, पदानि किल विसन्धिभावेनोच्चारयिष्यन्त इति संहितापदयोर्विशेष इति । '**निवासचितिशरीरोपसमाधानेष्वि**'ति (२५४-८), एतेष्वर्थेषु चिनोतेरादेः को भवति, एते च सर्व्वेऽप्यर्था अत्र च कायशब्दे व्युत्पाद्ये घटन्त एवेति यथाक्रमं दर्शयति–जीवस्य निवसादि शरीरं कायोऽभिधीयते कुतो ?, जीवस्य निवासादिति, सर्व्वाण्यपि पञ्चम्यन्तपदान्येवं योजनीयानि, एतदुक्तं भवति–यदा जीवनिवासत्वेन कायो विवक्ष्यते तदाऽत्रापि निवासलक्षणोऽर्थो लभ्यते, तथा चितिशब्देनापि निचयोऽभिधीयते, ततश्चात्रापि यदा पुद्गलनिचयः कायशब्दस्याभिधेयतया विवक्ष्यते तदा चित्यर्थोऽपि लभ्यते, पुद्गलविशरारुतायां च कायशब्दस्याभिधेयतया विवक्षितायां शरीरलक्षणोऽर्थः प्राप्यते, यदा च तेषामेव पुद्गलानामवयवेषु करचरणादिषु समाधानं सङ्घातो मीलनं कायशब्दाभिधेयतया

चिन्त्यते तदाऽवयवसमाधानलक्षणोऽर्थः, प्राप्यते, चीयते पुद्गलैरवयवसमाधानद्वारेण निर्वर्त्त्यत इति काय इति भावः । '**जीवबद्धा जीवसम्प्रयुक्ताश्चे**'ति (२५५-४), तत्र बद्धाः—शिथिलबन्धनपरिणत्या सङ्गृहीतमात्राः संप्रयुक्तास्तु त एव निविडबन्धनपरिणत्या आत्मसात्कृताः, अथवा बद्धाः कायरूपतया परिणतिमात्रमानीताः संप्रयुक्तास्तु कायनिर्वर्त्त्यधावनवल्गनादिक्रियायां व्यापारिता उच्यन्ते इति । '**अक्खलियसंहियाईवक्खाणचउक्कए दरिसियंमी**'त्यादि (२५६-१), ननु यद्यस्खलितसंहिता-दिव्याख्याचतुष्टये दर्शिते सति सूत्रस्पर्शकनिर्युक्तेरवसरस्तर्हि तस्यां चालनाप्रत्यवस्थाने एव वक्तव्ये प्राप्नुतः, शेषव्याख्याङ्गचतुष्टयस्य वृत्तिकृताऽपि दर्शितत्वात्, ततश्च यत् तस्यां 'करणे भये य अंते' इत्यादिना पददर्शनं पदार्थकथनं पदविग्रहकरणं वा किं करिष्यति ?, तत्सर्वमतिरिच्यते, अथ तस्यामुच्यते तत्सर्वं तर्हि वृत्तिकृता यत्तस्य स्वरूपमाविष्कृतं तत्कथं न निष्फलमिति, सत्यमेतत्, किन्तु यद्यप्यस्यां सूत्रस्पर्शिकनिर्युक्तौ प्रायः सर्व्वाण्यपि व्याख्याङ्गानि दर्शयिष्यति तथापि नायं सर्वत्र नियमो, यतः स्थानान्तरे सूत्रस्पर्शनिर्युक्तिषु क्वचिच्चालनाप्रत्यवस्थाने एवाभिधीयेते, क्वचित्तु पदार्थमात्राद्येव किञ्चिदन्यतरव्याख्याङ्गमुच्यते, अतः सैद्धान्तिकी मुद्रेयं, यदुत—सर्वैरपि व्याख्यातृभिः व्याख्याचतुष्टयमभिधानीयं, ततः सूत्रस्पर्शिकनियुक्तिर्व्याख्येया, यत्तु पुनरपि निर्युक्तौ क्वचित्पदार्थाद्यभिधानं तेन वृत्तिकारोक्तमेव स्पष्टीकरिष्यत इत्यदोषः। '**शलाकाशल्यकाङ्गरु हादी**'ति (२५७-४), तत्र शलाका—वंशादिसम्बन्धिनी शल्यकाङ्गरुहं—सहिका (शिहिका) शूलमुच्यते । आह—'**इदं नामकरणमेवे**' त्यादि, (२५७-४) नामकरणमेवेदं, किं तद् ?, इत्याह—'**संज्ञाकरण**'मिति यदिहोच्यते भवद्भिः, कथमित्याह—पर्यायमात्रतः—पर्यायमात्रमाश्रित्य, संज्ञाशब्दस्य नामपर्यायत्वात्, संज्ञाकरणमित्यनेन नामकरणमेवोक्तं भवतीत्यर्थः। '**संज्ञाकरणं त्वन्वर्थत**' इति, क्रियतेऽनेनेति करणं, योऽयं करणशब्दस्य प्रतीयमानोऽर्थस्तमाश्रित्य संज्ञाकरणमिह गृह्यते, कुत एतदित्याह—**संज्ञायाः करणं संज्ञाकरणं, द्रव्यस्य संज्ञया निर्दिश्यमानत्वादिति,** एतदुक्तं भवति—यदि संज्ञा चासौ करणं चेति कर्म्मधारयसमासाश्रयणात्संज्ञामात्रस्यैवाभिधानं स्यात् तदा न स्यादपि नामकरणादस्य भेदः, तच्च नास्ति, यतः संज्ञया करणमिति तृतीयातत्पुरुषाश्रयणात्संज्ञाकरणशब्देन द्रव्यं पाइल्लकाद्यभिधीयते, तच्च करणशब्दाभिधेयार्थरूपतया द्रवणपरिणामस्वरूपमित्यन्वर्थो लभ्यते एवेति, अतः स्थितमिदं—नामकरणमपि यत्सान्वर्थं तत् संज्ञाकरणमिति परिभाषितं, शेषं त्वन्वर्थशून्यं नामकरणमिति, भाष्यकारेणाप्येतदेवोक्तं '**सन्ना णामंति मई**'त्यादि (२५७-७), सार्द्धगाथाव्याख्या—संज्ञाशब्देन नामैवोच्यते, ततश्च संज्ञाकरणस्य नामकरणान्न कश्चिद्भेद इति परस्य मतिः स्यादित्येवं परमतमाशङ्क्योत्तरमाह—यद्भवताऽभिहितं तन्न, संज्ञाकरणनामकरणयोरत्यन्तभेदात्, एतदेवाह—'**नामं जमभिहाणं**'ति (२५७-७), यद्—यस्मात्कारणान्नाममिति—नामकरणं—अभिधानमात्रमेवोच्यते,

अर्थानपेक्षककाररेफणकारस्वरूपवर्णत्रयनिष्पन्नवर्ण्णावलीमात्रमेवाभिधीयत इत्यर्थः, यद्वा तदर्थ-विकले—करणशब्दाभिधेयार्थविकले जीवादौ करणमिति नाम क्रियते तन्नामकरणमुच्यते, एतस्माच्च द्विभेदादपि नामकरणात् संज्ञाकरणं भिद्यत इति दर्शयति—द्रव्यं पुनर्यत्संज्ञाकरणशब्देनाभिधित्सता पेलुकरणादि रूतपूणिकाव(दिव)लनकादीत्यर्थः, तद् द्रवणपरिणामं करणशब्दाभिधेयार्थरूपतया परिणतिस्वभावमित्यर्थः अतो न तद् द्रव्यं पेलुकरणादिकं तदर्थशून्यं—करणशब्दार्थशून्यं न वा शब्दोऽर्थानपेक्षवर्ण्णावलीमात्रलक्षणः, एवं च नामकरणभेदद्वयादपि संज्ञाकरणस्य भेदो दर्शितो भवतीति **गाथार्थः**, आह—ननु यदि तद्द्रव्यं पेलुकरणादि करणशब्दार्थशून्यं न भवति किन्तु सान्वर्थं तर्हि भावकरणमेव तत् किमिति द्रव्यकरणाधिकारे पठ्यत इत्येतदेवाह—'**जइ न तयत्थविहीण**' मित्यादिगाथा (२५७-८) व्याख्या—यदि तदर्थविहीनं—करणशब्दार्थविहीनं न भवति द्रव्यं पाइल्लकादीतिशेषः 'तो'त्ति ततः किं—कस्माद्धेतोः द्रव्यकरणं तत् न तु भावकरणमिति ?, एवं च परेण साक्षेपं पृष्टे सत्याहाचार्यः—'जतो'त्ति यद् —यस्मात्कारणात् तेन पाइल्लकादिना करणेन द्रव्यं—कटादिकं क्रियते तस्मात्तद्द्रव्यकरणमुच्यते, एतदुक्तं भवति—द्रव्यस्य करणं द्रव्यकरणमित्येवं व्युत्पत्त्यर्थमाश्रित्य द्रव्यप्राधान्यविवक्षया तद्द्रव्यकरणमुक्तमिति, ननु द्रव्यं क्रियतेऽनेनेति द्रव्यकरणं तदस्तु, संज्ञाकरणं तु कया विवक्षयोच्यत इत्याह—संज्ञाकरणमिति च करणरूढित इति, एतदुक्तं भवति—तेषां हि पेलुकरणादीनां करणमिति संज्ञा क्वचिद्देशे रूढा, अतस्तां रूढिमाश्रित्य संज्ञाविशिष्टं करणं संज्ञाकरणमित्युच्यत इति गाथार्थः॥ '**पञ्चानामौदारिकादिशरीराणामाद्यं सङ्घातकरण**'मित्यादि (२६२-२), ननु चात्र यदुक्तमाद्यं सङ्घातकरणमिति तत् तैजसकार्म्मणयोर्न घटते अनादित्वात् न ह्यौदारिकवत् तयोः सर्वथा परित्यक्तयोः पुनर्भवान्तरसंभवोऽस्ति येनाद्यपुद्गलग्रहणलक्षणं संघातकरणं स्यात्, सत्यमेतत्, किन्तु प्रवाहापेक्षया तयोरनादित्वं, इदं चोक्तं व्यक्त्यपेक्षया, तथा च सति यन्मनुष्यादिभवे समुत्पन्नमात्रस्तद्योग्यपुद्गलग्रहणं करोति तत् तद्भवापेक्षयाऽऽद्यं तैजसकार्म्मणयोः पुद्गलसंघातकरणमुच्यते, न तु पूर्वभवसम्बन्धिशरीरं सर्वथा परित्यज्योत्तरभवशरीरं गृह्णतो य एकसामयिकपुद्गलग्रहणलक्षणः सिद्धान्तपरिभाषितः संघातः स इह गृह्यते किन्त्वाद्यपुद्गलग्रहणमात्रं, तच्च विवक्षितभवापेक्षया तयोरपि विद्यत इत्यदोषः । '**अथवेदमन्यादृक् त्रिविधं करणमि**'ति (२६३-१), एतदुक्तं भवति—"जीवप्पओगकरणं दुविहं मूलप्पओगकरणं चे"त्यादिना तावदेकया भङ्ग्या दर्शितं जीवप्रयोगकरणं, इदानीं तदेव प्रकारान्तरेण प्रदर्श्यत इति । '**इह च सर्व्वजघन्यमायुष्कं क्षुल्लकभवग्रहण**'मित्यादि (२६४-१२) अत्र यदानापानकालस्य सप्तदशभाग इत्यभिहितं तत् स्थूलन्यायमाश्रित्य, सूक्ष्मेक्षिकया तु किञ्चिन्न्यूनोऽसौ द्रष्टव्यो, यत एतस्यायमानयनोपायः—इह किलैकस्मिन् मुहूर्त्ते पञ्चषष्टिसहस्राणि पञ्चशतानि

षट्त्रिंशदधिकानि क्षुल्लकभवग्रहणानां भवन्तीति वृद्धसम्प्रदायः, तदुक्तं— *''पन्नट्ठिसहस्साइं पंचेव सया हवंति छत्तीसा । खुड्डागभवग्गहणा एगमुहुत्तंमि एवइया ॥१॥''* आनापानाश्चैकस्मिन्मुहूर्त्ते त्रीणि सहस्राणि सप्तशतानि त्रिसप्तत्यधिकानि भवन्ति, यदाह—*तिन्नि सहस्सा सत्त य सयाणि तेवत्तरिं च ऊसासा । एस मुहुत्तो भणिओ सव्वेहिं अणंतनाणीहिं ॥१॥* ततश्चानेनानापानराशिनाऽनन्तरो-
5 पदर्शितक्षुल्लकभवग्रहणराशेर्भागोऽपह्रियते, तद्यथा—६५५३६ $\frac{4}{2}$ ३७७३ लब्धं १७ उद्धरितस्त्वयं राशिः $\frac{१३९५}{३७७३}$ अत्र च यदि कश्चित्सूक्ष्मेक्षिकतया ज्ञातुमिच्छति तदा त्रयोदशशतानि पञ्चनवत्यधिकानि पुनरपि शतद्वयेन षट्पञ्चाशदधिकेन गुण्यन्ते, यत एतावत्य आवलिका एकस्मिन् क्षुल्लकभवग्रहणे भवन्तीति वृद्धाः, तथा चाहुः— *''दो य सया छप्पन्ना आवलिआणं तु खुड्डभवमाणं । जियरागदोसमोहेहिं जिणवरेहिं विणिद्दिट्ठं ॥१॥''* ततश्चायं राशिर्भवति—३५७१२० $\frac{4}{2}$ ३७७३, लब्धाश्चतुर्णवतिरावलिकाः
10 सातिरेकाः, एतावताऽभ्यधिकानि सप्तदशक्षुल्लकभवग्रहणा न्येकस्मिन्नानापानकाले भवन्ति । **'उक्कोसो समऊणो'** इत्यादि (२६५-८) गाथाव्याख्या—उत्कृष्ट औदारिकस्य सङ्घातपरिशाटकालः पल्योपमत्रयलक्षणः समयेन हीनो य उक्त इति शेषः 'उक्कोसगं तु पलियत्तियं तु समऊण' मित्यनेन ग्रन्थेन, स किमित्याह—स संघातनासमयेन हीनो मन्तव्यो, देवकुर्व्वादिषु भवान्तरादायातस्य यः प्रथमः संघातसमयस्तस्मिन्नपनीते शेषः समयोनपल्योपमत्रयलक्षणः कालोऽयमवाप्यत इत्यर्थः।
15 ननु यथा पल्योपमत्रयात्सर्व्वसंघातसमयोऽपनीयते तथा चरमसमयभावी सर्वपरिशाटसमयोऽप्यपनेय एव अतो द्विसमयहीनः कालोऽयं प्राप्नोतीति, एतदेवाह परः—**'किह न दुसमये'**त्यादि (२६५-९), कथं—केन प्रकारेण न द्विसमयहीनोऽसौ पल्योपमत्रयलक्षणः कालो भवति, क्व सति ?—सङ्घातसमयवत्परिशाटकसमयेऽपनीते सतीति गाथार्थः । अत्राचार्यो निश्चयमतमालम्ब्योत्तरमाह—**'भन्नती'**त्यादि, भण्यते अत्र प्रत्युत्तरं, किं तद् इत्याह—भवस्य मनुष्यादिसम्बन्धिनो योऽसौ
20 चरमसमयस्तस्मिन्नपि संघातपरिशाटौ समुदितावेव प्रवर्त्तेते, यस्तु केवलः परिशाटः स परभवसमय एव अतो न तेन हीनः कालः पल्योपमत्रयलक्षणः, निश्चयनयो हि निर्ज्जीर्यमाणं निर्ज्जीर्णमिच्छत्यतो यस्मिन् समये समस्तायुर्दलिकनिर्ज्जीयमाणतालक्षणः सर्वपरिशाटः स परभवायुष एव प्रथमसमय इति न प्राक्तनायुषो मध्यादपनेय इति गाथाभावार्थः। एवमभ्युपगमेऽन्यदोषं पश्यन् पुनरपि परः प्रेरयति—**'जइ परपढमे'** इत्यादि (२६६-१), यदि परभवप्रथमसमये प्राक्तनशरीरपुद्गलानां
25 सर्वपरिशाटोऽभ्युपगम्यते हन्त तर्हि यदा कश्चिज्जीवो निर्विग्रहतो—विग्रहमकृत्वा ऋजुश्रेण्यैवोत्पद्यते तदा तस्मिन्नेव समये अग्रेतनशरीरपुद्गलानां सर्वसङ्घातोऽप्यभ्युपगन्तव्य एव, भवत्वेवं को दोष इति चेद् अत्राह—ननु सर्व्वपरिशाटः सर्व्वसंघातश्चेत्येतद्द्वयं समय इत्येकस्मिन्नेव समयेऽभ्युपगम्यमानं विरुध्यते, युगपदायुर्द्वयानुभवप्रसङ्गात्, न चैतत्सिद्धान्तेऽभ्युपगम्यत इति गाथार्थः । अत्राचार्यो

निश्चयनयमतेनैवोत्तरमाह—'**जम्हा विगच्छमाण**'मित्यादि (२६६-२), यस्माद् विगच्छद्विगतं उत्पद्यमानं चोत्पन्नं तस्मात् परभवाद्यसमये सर्वमोक्षसर्वादानयोर्न कश्चिद्विरोधः, एतदुक्तं भवति—निश्चनयमते प्राग्भवायुःपुद्गला अपनीयमाना अपगता एव द्रष्टव्याः, तत्कथमागामिभवायुःपुद्गलैरूत्पन्नैः सहैकस्मिन् समये तेषामनुभूयमानता समस्ति येन विरोधः स्यादिति गाथार्थः । आचार्य एवाभ्युच्चयदूषणमाह—'**चुतिसमये**'त्यादि (२६६-३), व्याख्या—च्युतिसमये इहभवायुःपुद्गलसर्वपरिशाटसमये तावदिहभवो न भवत्ययं, कुतः ?—इहभवसम्बन्धिदेहविमोक्षात् सर्वपरित्यागेन परित्यक्तत्वाद्, यथाऽतीतजन्मनीहभवो नास्त्यत्रत्यदेहाभावात् तथा च्युतिसमयेऽप्यसौ न भवत्येव, इहभवदेहाभावस्याविशेषाद्, एवं च सति यदि तस्मिँश्च्युतिसमये परभवोऽपि भवता नाभ्युपगम्यते तदाऽसौ संसारी जीवः को भवतु ?, इहभवत्वस्य तावद्युक्तित एव निषेधात् परभवत्वस्य तु त्वयाऽप्यनभ्युपगम्यमानत्वात् निर्व्यपदेश्य एवासौ स्यादिति गाथार्थः ॥ अत्राह परः—'**णणु जह विग्गहकाले**'इत्यादि (२६६-४), नन्विति आक्षेपे, ननु यथा विग्रहकाले—वक्रेण परभवगमनकाले पारभविकदेहाभावेऽपि परभवसम्बन्धी जीवो व्यपदिश्यते तथा—तेनैव प्रकारेणेहभवसम्बन्धिनो देहस्याभावेऽपि भवेदिहभवोऽपि न कश्चिद्दोषः एतदुक्तं भवति—यथा वक्रगतौ परभवशरीराभावेऽपि परभवत्वेन व्यपदेशः तथेहभवशरीराभावेऽपि च्युतिसमये इहभवत्वेन व्यपदेशोऽभ्युपगन्तव्य एव, न्यायस्य समानत्वादिति गाथार्थः । आचार्य आह—नन्वेतद् ब्रुवता त्वया अस्मत्साहाय्यमेवानुष्ठितं स्याद्, यतो यथा विग्रहकाले पारभविकशरीराभावेऽपि परभवव्यपदेशः तथा च्युतिसमयेऽपीहभवशरीरत्यागे सति परभवशरीराभावस्य तुल्यत्वाद्विग्रहकालवदेव परभवव्यपदेशः किं नाभ्युपगम्यत इति ?, एतदेवाह—'**जं चिय विग्गहकाले**' इत्यादि (२६६-५) यत एव कारणाद्विग्रहकाले देहाभावेऽपि—परभवशरीराप्राप्तावपि परभवोऽसौ भवतोऽपि सम्मतः तत एव तर्हि च्युतिसमयेऽपीहभवसम्बन्धी परभवसम्बन्धी वा नास्ति देहोऽतो देहाभावस्य तुल्यत्वाद्विग्रहकालवत् च्युतिसमयेऽपि कस्मात् परभवव्यपदेशो नाभ्युपेयते, 'न विग्गहो जइ'त्ति यदि पुनरेवं ब्रूयात्परो यदुत—असौ च्युतिसमयो न विग्रहः परभवव्यपदेशतु विग्रहकाल एव मयाऽभ्युपगम्यते, तत्रोच्यते—'स को होउ'त्ति यदि च्युतिसमयो विग्रहो न भवतीति नास्य परभवत्वं प्रतिपद्यते हन्त तर्हि संसारी जीवस्तदा को भवतु ?, इहभववपुषस्त्यक्तत्वात्परभवस्य च त्वयाऽप्यनभ्युपगम्यमानत्वात् तथैव—निर्व्यपदेश्य एव स्यादिति गाथार्थः । जघन्यसंघातान्तरभावनामाह—'**संघायंतरकालो**' गाहा '**तेहूणं**' गाहा (२६७-१०), व्याख्या—एकदा संघातं कृत्वा पुनः शरीरान्तरे सङ्घातं कुर्वतो योऽसौ जघन्योऽन्तरकालः स त्रिसमयहीनः क्षुल्लकभवमानोऽवसेयः, स च कदा लभ्यत इत्याह—परभवमविग्रहेण गत्वा प्रथमसमये संघातयतः—सर्वसंघातं कुर्वतो जीवस्य लभ्यत इति द्वितीयगाथायां सम्बन्धः, किं

कृत्वा यत् परभवगमनमित्याह—क्षुल्लकभवग्रहणलक्षणमायुर्विधृत्य, कथम्भूतं ?—न्यूनं, कैः ?—तैस्त्रिभिः समयैरिति गम्यते, ये किमित्याह—द्वौ विग्रहसमयावेकश्च संघातनासमयः सर्वेऽपि त्रयः, अयमत्र भावार्थो—जघन्यान्तरकालस्य प्रस्तुतत्वात्प्राग्भवात् कृतविग्रहोत्पन्नस्य जन्तोरिह ग्रहणं, अन्यथा हि मध्यमः कालः स्यात्, ततश्च कश्चिज्जीवः क्वचित्पूर्वभवेऽसत्कल्पनया विंशतिसमयप्रमाणक्षुल्लकभवग्रहणस्वरूपमायुर्बद्ध्वा यदा समयद्वयविग्रहेण वनस्पतिषु उत्पद्यते तृतीयसमये च संघातं करोति ततः शेषसप्तदशसमयान् जीवित्वाऽन्यत्र क्वचिदविग्रहेणोत्पद्य संघातं करोति तदा त एव सप्तदश समयाः संघातद्वयान्तरं भवतीति गाथाद्वयार्थः । इदानीमुत्कृष्टसंघातान्तरं भावयति—**'उक्कोसं तित्तीसं'** गाहा (२६८-२), **'काऊण पुव्वकोडिं'** गाहा (२६८-३), व्याख्या—सागरोपमाणीत्यस्य व्यवहितः सम्बन्धः, ततश्च त्रयस्त्रिंशत्सागरोपमाणि समयाधिक-पूर्वकोट्यभ्यधिकान्यौदारिकसंघातान्तरमुत्कृष्टं भवतीति गम्यते, कदा पुनरयं संघातान्तरकालो लभ्यत इत्याह—सः—उक्तलक्षणः काल इह तृतीयसमये संघातयतः—सर्वं संघातं कुर्वतो लभ्यत इति द्वितीयगाथायां संटङ्कः, किं कृत्वा ? इत्याह—कुतश्चित्पूर्वभवादविग्रहेण इह तावन्मनुष्यभवे समागत्य प्रथमसमये संघातं कृत्वा पूर्वकोटिं विधृत्य—पूर्वकोटिप्रमाणमिहायुष्कं परिपाल्य ततश्च ज्येष्ठमायुष्कं त्रयस्त्रिंशत्सागरोपमलक्षणं सुरेष्वनुत्तरविमानेषु भुक्त्वा च्युतः समयद्वयं विग्रहे विधाय तृतीयसमये संघातं विधत्ते, एवं च सति समयोना पूर्वकोटिः प्रथमा त्रयस्त्रिंशत्सागरोपमाणि देवभवसम्बन्धीनि पुनरपीहागतस्य विग्रहसत्कसमयद्वयं च संघातद्वयस्यान्तरं भवति, अत्र च विग्रहसत्कसमयद्वयमध्यादेकः प्राक्तनपूर्वकोट्यां प्रक्षिप्यते, अतः त्रयस्त्रिंशत्सागरोपमाणि समयाधिकपूर्वकोट्यधिकानि संघातान्तरं भवतीति गाथाद्वयार्थः । **'इदं पुनः सर्वसाटान्तरं सर्व (जघन्यं) क्षुल्लकभवमानं, कथम् ?, इहानन्तरातीतभवचरमसमये'** इत्यादि (२६८-४) अत्राह—ननु कश्चिदौदारिकशरीरी सर्वसाटं कृत्वा वनस्पतिष्वागत्येत्यादिभावना नातीव घटामियर्त्ति, यतः 'परभवपढगे साडो' इति न्यायाद् वनस्पत्यायुष एव मध्यात् साटसमयस्यापगमो युक्तः, तन्मध्याच्च तस्मिन्नपनीते समयहीनं क्षुल्लकभवग्रहणं जघन्यं शाटान्तरं प्राप्नोति, तथोत्कृष्टसाटान्तरभावनायामपि यदुच्यते कश्चित्संयतमनुष्य औदारिकसर्वसाटं कृत्वा इत्यादि, तदपि न युक्तिसङ्गतं, यतस्तत्राप्युक्तन्यायेन देवभवायुष एव मध्यात्साटसमयः पतितुमर्हति, एवं च सति समयोनपूर्वकोट्यधिकानि त्रयस्त्रिंशत्सागरोपमाण्युत्कृष्टं शाटान्तरं स्यादिति, अत्रोच्यते, अत्र जघन्यशाटान्तरपक्षे वृत्तिकारो भवदभिप्रेतमेव समयोनक्षुल्लकभवग्रहणमानं शाटान्तरं गुरवस्तु व्याचक्षत इत्यादिनाऽभ्युपगमयिष्यति, केवलमुत्कृष्टशाटान्तरपक्षे वृत्तिकृताऽपि न किञ्चिदुक्तं परं, किन्तु जघन्यशाटान्तरानुसारत, एवोत्कृष्टपक्षेऽपि भवदुक्तमेव शाटान्तरं वृत्तिकारस्याप्यभिमतमिति लक्ष्यते,

यत्त्विह कश्चित् संयतमनुष्य औदारिकसर्वशाटं कृत्वेत्यादिनोत्कृष्टशाटान्तरभावनां कुर्वता परिपूर्णपूर्वकोट्यधिकानि त्रयस्त्रिंशत्सागरोपमाणि वृत्तिकारेणोक्तानि न पुनः समयहीनपूर्वकोट्यधिकानि तत् किल '**खुड्डागभवग्गहणं जहन्नमुक्कोसयं तु तेत्तीस**'मित्यादिभाष्यगाथामनुवर्त्तमानेनोक्तं, ननु यदि समयहीनं क्षुल्लकभवग्रहणं सर्वशाटान्तरं वृत्तिकृतोऽप्यभिप्रेतं तर्हि गाथायां यदुक्तं "तिसमयहीणं खुड्डु"मित्यादि तत्कथमुपपन्नं स्याद् ?, इदं हि गाथाशकलमनन्तरमेव वृत्तिकारेण स्वयमेवेत्थं विवृतं, तत्र त्रिसमयहीनं सर्वबन्धस्य क्षुल्लं तु सम्पूर्णं सर्वशाटस्येति, उत्कृष्टशाटान्तरपक्षे तु न किञ्चिद् ब्रूमः, तस्य गाथायामनुक्तस्यैव वृत्तिकृता भाष्यगाथानुवृत्त्या भावितत्वादिति, अत्राह— स्वयमेव वृत्तिकारः '**तथा च किलैवमक्षराणि नीयन्त**'इत्यादि (२६९-२), एतदुक्तं भवति— नात्र कर्म्मधारयः क्रियते त्रयश्च ते समयाश्चेति किन्तु द्वन्द्वः त्रयश्च समया इति गम्यते समयश्च त्रिसमयास्तैर्हीनं, एवं तु सति सर्वबन्धस्य त्रिभिः सर्वशाटस्य च समयेन हीनं क्षुल्लकमित्युक्तं भवति, इदं च सर्वं भाष्यकारेण सह विरुध्यते, यतः स आह—"खुड्डागभवग्गहणं जहन्नमुक्कोसयं च तेत्तीसं । तं सागरोवमाइं सपुन्ना पुव्वकोडी उ ॥१॥" अत्र चोत्तराध्ययनबृहट्टीकादिषु भाष्यकृद्वचनसमर्थकं समाधानं दृश्यते, तच्चेदं—अनन्तरातीतभवचरमसमय एव कश्चिदौदारिकशरीरी सर्वपरिशाटं कृत्वा वनस्पतिषूत्पद्यते, न पुनर्वनस्पत्यायुषः प्रथमसमये सर्वपरिशाटं करोति, व्यवहारमताश्रयणात्, "परभवपढमे साडण" मित्यस्य च निश्चयमताश्रयणात्, ततश्च यदा वनस्पतिषूत्पन्नः परिपूर्ण्णक्षुल्लकभवग्रहणमतिवाह्यान्यत्रोत्पद्यते तदा परभवप्रथमसमये सर्वशाटं करोति, अत्र निश्चयमताश्रयणाद्व्यवहारनयमतस्य चानाश्रयणाद्, एवं च सत्यादौ व्यवहारनये पर्यन्ते च निश्चयनये समाश्रियमाणे सम्पूर्णं क्षुल्लकभवग्रहणं साटद्वयस्यानन्तरमवाप्यत इत्येवं न भाष्यकृद्वचो विरुध्यते, तथोत्कृष्टान्तरपक्षेऽपि यदा कश्चित् संयतमनुष्यस्तद्भवस्यैव चरमसमये उक्तन्यायेन सर्वपरिशाटं करोति न परभवस्य प्रथमसमये तदानुत्तरेषु परिपूर्ण्णानि त्रयस्त्रिंशत्सागरोपमाणि, पुनरपि च मनुष्येष्वागतः पूर्वकोटिं चातिवाह्यान्यत्रोत्पद्यमानो निश्चयनयमतेन परभवप्रथमे साटं करोति तदा त्रयस्त्रिंशत्सागरोपमाणि सम्पूर्णा च पूर्वकोटिः शाटद्वयस्योत्कृष्टमन्तरमवाप्यत इत्येवमुत्कृष्टपक्षेऽपि भाष्यकारवचनमविरोधेन गमितं भवति, अत्राप्यादौ व्यवहारस्यान्ते च निश्चयस्याश्रयणादिति सर्वं सुस्थमिति। एवं तावदेकैकमधिकृत्य पृथक् संघातस्य परिशाटस्य चान्तरमुक्तं, इदानीं युगपदुभयस्यान्तरकालभावनामाह—'**उभयंतर**' गाहा '**अणुभविउं**' गाहा (२६९-१०) व्याख्या— उभयं—संघातपरिशाटलक्षणं तस्य जघन्यतः समयप्रमाणोऽन्तरकालो विज्ञेयः, कदाऽसौ लभ्यत इत्याह—"निव्विग्गहसंघाए"त्ति इयमत्र भावना—अविशिष्टः कश्चिदौदारिकशरीरी मृत्वाऽन्यत्र ऋजुश्रेण्या समुत्पद्य प्रथमसमये संघातं कृत्वा यदा द्वितीयसमये संघातपरिशाटलक्षणमुभयं करोति तदा

संघातसमय एवैक उभयान्तरे भवतीति, उत्कृष्टमुभयान्तरमाह–परमं–प्रकृष्टं उभयान्तरमिति सम्बध्यते, सह त्रिभिः समयैर्वर्त्तत इति सत्रिसमयानि त्रयस्त्रिंशत्सगारोपमाणि भवन्ति, कदा पुनरमूनि लभ्यन्ते ? इत्याह–देवादिष्वादिशब्दादप्रतिष्ठाने त्रयस्त्रिंशत्सागरोपमाणि अनुभूयेहागतस्य तृतीयसमये संघातयतो ज्ञेयानि समयकुशलैः, अयमत्र भावार्थः–इह कश्चिन्मनुष्यादिः स्वभवचरमसमये संघातपरिशाटौ समुदितौ कृत्वा अनुत्तरसुरेष्वप्रतिष्ठाने वा यदा त्रयस्त्रिंशत्सागरोपमाण्यनुभूय पुनरपीह विग्रहेणोत्पन्नस्तृतीयसमये संघातं कृत्वा तत उभयमारभते तदा द्वौ विग्रहसमयावेकश्च संघातसमयो देवादिभवसम्बन्धीनि च त्रयस्त्रिंशत्सागरोपमाण्युत्कृष्टोभयान्तरे प्राप्यन्त इति गाथाद्वयार्थः । औदारिकसङ्घातादिवक्तव्यता समाप्ता॥

वैक्रियोभयस्य भावनामाह—**'उभयं जहन्नसमओ'** गाहा (२७१-६), उभयं–संघात-परिशाटलक्षणं जघन्यं वैक्रियशरीरस्य समयप्रमाणं भवति, कस्य तद्भवतीत्याह–समयद्वयं विकुर्व्य मृतस्य, यो हि किलौदारिकशरीरी वैक्रियमारभ्य प्रथमसमये सर्व्वसंघातं द्वितीयेसमये तु संघातपरिशाटौ विधाय म्रियते तस्यैकसामयिकं वैक्रियस्य संघातपरिशाटलक्षणमुभयमवाप्यते, उत्कृष्टं वैक्रियोभयकालमाह–परं–उत्कृष्टं वैक्रियस्योभयं संघातसमयहीनानि त्रयस्त्रिंशत्सागरोपमाण्य-नुत्तरदेवस्याप्रतिष्ठाननारकस्य वा भवन्तीति गाथार्थः । वैक्रियस्यैव सङ्घाताद्यन्तरभावनामाह–**'संघायंतरसमओ'** गाहा (२७२-१), व्याख्या–एकदा वैक्रियसंघातं कृत्वा पुनरपि वैक्रियसंघातं कुर्वतो जघन्यमन्तरं समयो भवति, कदा ? इत्याह–''समये'' त्यादि जघन्यान्तरकालस्तृतीयसमये दिवि संघातयतो विज्ञेयः, कस्य ?–समयमेकं विकुर्व्य मृतस्य, यो ह्यौदारिकशरीरी समयमेकं वैक्रियसंघातं कृत्वा मृतः सन् समयमेकं विग्रहं च विधाय तृतीयसमये दिवं गत्वा संघातयति तत्सम्बन्धिनः सङ्घातद्वयस्य विग्रहसमयोऽन्तरे प्राप्यत इति भावना, अथवेदमेवान्तरं प्रकारान्तरेणाह–तृतीये वा समये मृतस्य तृतीयसमये सङ्घातयत इति सम्बध्यते, एतदुक्तं भवति–यः कश्चिदिहौदारिकशरीरी वैक्रियलब्धिमान् वैक्रियशरीरमारभ्य प्रथमसमये सङ्घातं विधत्ते द्वितीयसमये च सङ्घातपरिशाटौ तृतीयसमये म्रियते तस्मिन्नेव च तृतीयसमये निर्विग्रहेण सुरलोकमवाप्य वैक्रियसङ्घातं करोति तस्य जन्तोः सम्बन्धिनः सङ्घातद्वयस्यान्तरे सङ्घातपरिशाटसमयः प्राप्यत इति गाथार्थः । ''ततिए व मयस्स ततियंमित्ति'' एतद्गाथादलं किञ्चिद्दुरवबोधमिति सम्प्रधार्य भावनामात्रमाह वृत्तिकारः–अविग्रहेण सङ्घातयत इत्यादि भावितमेवेति, साम्प्रतमुभयस्य परिशाटस्य चान्तरकालभावनामाह–**'उभयस्सेत्यादि'** गाथा (२७२-३), व्याख्या–उभयस्स–वैक्रियसम्बन्धिनः संघाटपरिशाटलक्षणस्य समय एको जघन्यमन्तरमित्यध्याहारः, कस्य जन्तोरिदमवाप्यते ? इत्याह–चिरमन्तर्मुहूर्त्तमानं कालं विकुर्व्य वैक्रियवपुषि स्थित्वा मृतस्य देवेष्वविग्रहगतस्य जन्तोः

सङ्घातसमयोऽन्तरे प्राप्यते, अयमत्र भावार्थः—य औदारिकशरीरी वैक्रियलब्धिमानारचितवैक्रियशरीरः परिपूर्णं मनुष्यवैक्रियशरीरस्थितिकालं यावत्सङ्घातपरिसाटौ विधाय म्रियतेऽविग्रहेण च सुरालये समुत्पद्य प्रथमसमये वैक्रियसङ्घातं करोति द्वितीयादिसमयेषु तु संघातपरिशाटौ तत्सन्बन्धिन उभयस्स चान्तरे स एवानन्तरोक्तः संघातसमयो भवतीति, ननु यद्येवं "चिरवेउव्वियमयस्से"त्यत्र चिरग्रहणमपार्थकम्, इह हि मनुष्यादिषु यश्चिरं स्तोकं वा कालं वैक्रियसङ्घातपरिशाटौ कृत्वाऽविग्रहेण दिवि समुत्पद्यते तेनैव प्रयोजनं, किं चिरशब्दविशेषणेन ?, सत्यं, किन्तु प्रथमसमयेऽपि मरणनिषेधार्थमित्थमुक्तं, यदिवाऽनन्तरं वैक्रियसङ्घातान्तरं भावयता सप्रयोजनत्वाद् द्वितीयादि-समयेष्वाकस्मिकमसमाप्तवैक्रियस्यापि मरणमुक्तं अत्र त्वसमाप्तवैक्रियस्यापि मरणनिदर्शने न किञ्चित्प्रयोजनमिति ख्यापनार्थं चिरग्रहणेन परिपूर्णान्तर्मौहूर्त्तिकमनुष्यादिवैक्रियस्थितिकालानुज्ञामपि कृतवानाचार्य इत्यदोषः । '**साडस्संतोमुहुत्तो**'त्ति, एकदा वैक्रियसर्वशाटं कृत्वा पुनरपि तत्सर्वशाटं कुर्वतोऽन्तर्मुहूर्त्तं जघन्यमन्तरं भवति, कथमिति चेद् ? उच्यते—कश्चिदौदारिकशरीरी वैक्रियलब्धिमान् कस्मिँश्चित्प्रयोजने वैक्रियशरीरमारभ्यान्तर्मुहूर्त्तं तथैवावस्थितिं विधाय चरमसमये तत्सर्वशाटं कृत्वा पुनरप्यौदारिकमाश्रयति, ततस्तत्रान्तर्मुहूर्त्तं स्थित्वा पुनरप्युत्पन्ने प्रयोजने वैक्रियं निर्वर्त्तयत्यन्तर्मुहूर्त्तं च तत्र स्थितिं कृत्वा पुनरप्यौदारिकमागच्छँश्चरमसमये वैक्रियसर्वपरिशाटं करोति, एवं सति शाटद्वयस्यान्तरे समयोनमन्तर्मुहूर्त्तद्वयं भवति, तेन च द्वयेनापि लघुत्वादेकमेव पुष्टतरमन्तर्मुहूर्त्तं निष्पद्यते अतो युज्यते जघन्यशाटान्तरमन्तर्मुहूर्त्तमिति, सङ्घातादित्रयस्याप्युत्कृष्टमन्तरमाह—'**तिण्हवि तरु कालमुक्कोसं**'ति, यदा कश्चिज्जीवो वैक्रियशरीरस्य सङ्घातादित्रयं कृत्वा वनस्पतिषूत्पन्नः तत्र चानन्तकालमतिवाह्य तत उद्वृतः पुनरपि क्वचिद्वैक्रियशरीरमासाद्य तत्संघातादित्रयं करोति तदा तत्सम्बन्धिनः संघातपरिशाटोभयलक्षणस्य त्रयस्याप्यन्तरे स एव वनस्पतिकालो भवतीतिगाथार्थः। '**ततश्चात्र व्युत्पत्तिभेदमात्रमाश्रीयत**' इति (२७५-९), एतदुक्तं भवति—पूर्वं हि "जीवमजीवे पाओगियं त्वि"त्यादि ब्रुवता अजीवे—कुसुम्भादौ करणमजीवकरणमिति सप्तमीतत्पुरुषः सूचितः, इह तु जीवप्रयोगात्करणं जीवप्रयोगकरणमिति पञ्चमीतत्पुरुष इत्येतावन्मात्रेण भेदः । '**तदिह व्यञ्जनशब्देन क्षेत्राभिव्यञ्जकत्वा**'दित्यादि (२७६-८), व्यज्यते—घटाकाशं पटाकाशमित्यादि-व्यपदेशैर्विशेषणद्वारेण प्रकटीक्रियते क्षेत्रममीभिरिति व्यञ्जनं पुद्गलाः घटपटशकटलकुटादयः '**तत्सम्बन्धादि**'ति व्यञ्जनसम्बन्धात् पर्यायमापन्नं व्यञ्जनपर्यायापन्नं, एतदुक्तं भवति—यदैकस्मिन्नभोदेशे व्यवस्थितो रक्तो घटः प्रयोगान्तरेण शुक्लीक्रियते तदा पूर्वं तन्नभो रक्तघटसम्बद्धमासीत् पश्चात्तदेव शुक्लघटसम्बद्धमभूद्, एवं च सति स शुक्लगुणलक्षणः पर्यायो वस्तुवृत्त्या तस्यैव नभस उत्पन्नः, एवमन्यस्यापि पुद्गलराशेर्यः प्रतिक्षणं पर्यायसमूहः समुत्पद्यते तमापन्नं नभो यदा विवक्ष्यते तदा नभसोऽप्यस्ति करणं, तथापि पर्यायस्यैव करणं न व्योम्न इति चेदित्याह—'**पर्यायो द्रव्यादनन्य**'इति

(२७६-९), तस्मिन्कृते द्रव्यमपि कृतमेव भवति, यदिवा किमनेन कष्टोत्तरेण, लौकिकादेवोपचा वारात्सिध्यति क्षेत्रस्य करणं, सम्भवन्ति ह्येवं वक्तारो लोकाः—इक्षुक्षेत्रं शालिक्षेत्रं वा मया कृतमिति, एतद्दर्शयति—'**उपचारमात्राद्वे**'त्यादि (२७६-१०) । अथ यदा वर्त्तनास्वरूपः कालो विवक्ष्यते तदा वर्त्तनादीनां स्वयमेव भावान्मा भूत् कालस्य करणं यदा त्वर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्ती समयादिरूपः कालो विवक्ष्यते तदा तस्य परकृतत्वात् करणत्वं भविष्यतीत्याह—'**समयाद्यपेक्षायां चापरोपादानत्वादि**'ति (२७७-७), न हि समयादिरूपस्यापि कालस्योपादानभूतः—कारणभूतः कश्चनापि परो विद्यते, तदा तस्य परकृतत्वात्करणत्वं भविष्यतीत्याह—तस्यापि स्वरससिद्धत्वात्कुत करणतेति भावार्थः । '**बवं च बालवं चे**'त्यादि (२७८-२), इयमत्र भावना—कृष्णचतुर्दशीरात्रौ शकुनिर्नामावस्थितं करणं भवति, अमावास्यायामह्नि चतुष्पदं रात्रौ नागं शुक्लपक्षप्रतिपदि दिवा किंस्तुघ्नं, एतानि चत्वार्यप्यवस्थितानि करणान्युच्यन्ते, एतास्वेव तिथिषु भवन्तीतिकृत्वा, तस्या एव शुक्लप्रतिपदो रात्रौ बवनाम करणं भवति इदं चानवस्थितम्, एतस्यामन्यासु च तिथिषु भावाद्, एवं शेषेष्वपि बालवादिष्वनवस्थितत्वमवसेयं, एवं शुक्लद्वितीयायां दिवा बालवं रात्रौ कौलवं तृतीयायां दिवा थीविलोयणं रात्रौ गरमित्येवमेकैकस्यां तिथौ क्रमेण करणद्वयं २ पुनरावृत्त्यापि तावज्ज्ञेयं यावत्कृष्णपक्षचतुर्दश्यां दिवा विष्टिस्ततस्तन्निशाया आरभ्य पुनरप्यवस्थितानि तान्येव शकुन्यादीनि तावद्यावत् सितपक्षप्रतिपदि दिवा किंस्तुघ्नमित्यादि पुनस्तदेवावर्त्तते । 'पक्खतिहीओ दुगुणिया'इत्याद्यानयनोपायोऽप्यवस्थितकरणभोग्यतिथिभ्योऽन्यतिथिषु द्रष्टव्यः, तास्ववस्थितकरणानामेव सिद्धत्वादिति । '**सत्तमिचाउद्दसी य अह विट्ठि**'त्ति (२७९-७), कृष्णसप्तम्यां चतुर्दश्यां चाह्नि विष्टिर्भवतीत्यर्थः । '**इदमेवमिती**'ति (२८१-११), इदं—श्रुतमेवं—बद्धाबद्धभेदभिन्नं लौकिकलोकोत्तरभेदं द्रष्टव्यं, लौकिकं बद्धाबद्धं लोकोत्तरं चेत्यर्थः । '**शास्त्रोपदेशव**'दिति (२८१-११), शास्त्ररूपः उपदेशः शास्त्रोपदेशः—आचारादिः तद्वदिति । '**भूतापरिणते**'त्यादि (२८२-६), भूतापरिणतविगतशब्दैर्यथासङ्ख्यमुत्पादध्रौव्यव्यया उच्यन्ते तेषां यच्छब्दकरणं—भणनं प्रतिपादनमित्यर्थः तत्प्रकाशोपदिश्यमानत्वादनिषीथमिति भावार्थः । '**सट्टीएयरुज्झाय**'त्ति (२८४-६) सट्टीयरौ—मातृष्वसृजातौ भ्रातरौ उपाध्यायौ—पूर्व्वावस्थायामध्यापकब्राह्मणौ ततः कर्म्मधारय इति। '**बत्तीसं अड्डीयाओ**' इत्यादि (२८५-४), अड्डिकाप्रत्यड्डिकाश्च धनुर्धराणां स्थानविशेषा लोकप्रतीताः, तत्प्रतीताः पाठविशेषा वा इत्यन्ये, करणानि—नर्त्तक्यादीनामालीढादीन्यपि धनुर्द्धरादीनामेव स्थानानि वैशिष्ट्याच्च कुतश्चित्पृथगुपात्तानि । '**भावश्रुतशब्दकरणेऽधिकारो भवति कर्त्तव्य**' इति (२८८-१), भावश्रुतं च शब्दश्च तद्रूपकरणं भावश्रुतशब्दकरणं, तत्र भावश्रुतमन्तर्जल्पाकारं श्रुतोपयोगरूपं, शब्दकरणं तु नात्र करेमि भंते ! सामाइयं सव्वं सावज्जं जोगगित्यादि-

सामायिकशब्दोच्चारणं निरुपयोगस्य सम्बन्धि गृह्यते, किं तर्हि गृह्यते ? इति चेदित्याह– '**तच्छब्दविशिष्टः श्रुतभाव एवे**'ति (२८८-३), तस्य–सामायिकस्य अभिधायकत्वेन सम्बन्धी यः शब्दः–करेमि भंते ! सामायिकमित्यादिस्तेन विशिष्टो–युक्तः श्रुतभाव एवेति गृह्यते, तत इदमुक्तं भवति–भावश्रुतेऽन्तर्जल्पाकारे केवले बहिःशब्दोच्चारणसहिते च श्रुतसामायिकस्यावतारो भवति । '**मनोवाग्योजनायां सत्यासत्यामृषाद्वये द्वयस्ये**'ति (२८८-६), अत्र किल श्रुतसामायिके सम्यक्त्वसामायिकस्य चारित्रसामायिके तु देशविरतिसामायिकस्यान्तर्भावं चेतसि निश्चित्येत्थमाह– द्वये–सत्यासत्यामृषामनोवाग्योगलक्षणे द्वयस्यापि–श्रुतचारित्रसामायिकलक्षणस्यावतारो भावनीय इति, अन्यथा हि यद्यन्तर्भावं नाभिप्रेयात् तदा सामायिकचतुष्ट्यस्यापि तत्रावतारं ब्रूयात्, न ह्युक्तं, मनोवाग्योगद्वयवतश्चत्वार्यपि सामायिकानि न सम्भवन्तीति । '**काययोजनायामपि द्वयस्याद्यस्य चे**'त्ति (२८८-७) द्वयस्य–श्रुतचारित्रसामायिकलक्षणस्य काययोजनायामवतारो वेदितव्यो, ननु हस्तादिना भङ्गादिवर्त्तनात् तदवष्टम्भेन चान्तर्ज्जल्पस्य बहिःशब्दस्य च प्रवृत्तेर्भवतु श्रुतसामायिकस्य काययोगेऽवतारः, चारित्रं तु निश्चयतः सावद्ययोगनिवृत्तिरूपो जीवपरिणामो यदाह—''आया खलु सामाइय'' मित्यादि तत्कथं तस्य काययोगेऽवतार इत्याशङ्क्याह—'**आद्यस्य चे**'ति एतदुक्तं भवति–कायावष्टम्भेन यत्प्रवर्त्तते बाह्यप्रत्युपेक्षणादिक्रियारूपं व्यावहारिकचारित्रं तदपेक्षया द्वयस्यापि तत्रावतार उक्तो, नैश्चयिकं त्वात्मपरिणामरूपं चारित्रमपेक्ष्य यदि प्रेर्यते भवता तदाऽऽद्यस्यैव श्रुतसामायिकस्य काययोजनायामवतारो भावनीय इति । '**उच्छुवणे सालिवणे**'इत्यादि गाथा (३००-१३)–इक्षुक्षेत्रशालिक्षेत्रयोः समीपे पद्मिनीपटलमण्डितस्य सरसः समीपे कुसुमिते वा चम्पकवृक्षादिवनखण्डे गम्भीरः–पर्वतनितम्बादिषु नानाजातीयानेकप्रशस्तवृक्षनिकराकीर्ण्णो गह्वरप्रदेश उच्यते, सानुनादस्तु यत्र शब्दे समुच्चरिते दिक्षु प्रतिशब्दः समुत्तिष्ठति गम्भीरश्च सानुनादश्चेति विगृह्यैकवद्भावाद्गम्भीरसानुनादं तस्मिन्नेवम्भूते प्रदेशे नद्यादिषु च यत्र दक्षिणावर्त्तेन जलमावर्त्तते तत्समीपे जिनगृहे वा सामायिकं शिष्याय दीयत इत्यनन्तरवक्ष्यमाणगाथाक्रिया सर्वत्र सम्बध्यत इति गाथार्थः । '**संझागयं रविगय**'मित्यादि (३०२-६) गाथाव्याख्या—सन्ध्यागतं–यत्सन्ध्यायामुदेति यथा–कार्त्तिकमासप्रथमदिनसन्ध्यायां कृत्तिका, मार्गशीर्षे वा मृगशिर इत्यादि, रविगतं–यत्रादित्योऽवतिष्ठते, विडुरं नाम कृतवक्रग्रहाधिष्ठितं, सग्गहं–क्रूरग्रहाध्यासितं, विलम्बितं–यदादित्येन भुक्त्वाऽनन्तरमेव त्यक्तं, राहुहयं (गतं) यत्र रवेश्चन्द्रमसो वा ग्रहणमभूद्, ग्रहभिन्नं–नाम यद्भित्त्वा भौमाद्यन्यतरो ग्रहो मध्येन विनिर्ग्गतः, एतानि सप्त नक्षत्राणि सामायिकं प्रयच्छन् वर्ज्जयेदिति गाथार्थः । '**अभिवाहारो कालियसुयस्से (सुअंमी)**'त्यादि गाथा (३०३-२), —अत्राभिव्याहारो नाम शिष्याचार्ययोरुक्तिप्रत्युक्त्यादिना प्रकारेण सामायिकादिश्रुतस्योद्देशसमुद्देशादिविधिरुच्यते, स

च सामायिके प्रकृतेऽपि प्रसङ्गतः सर्व्वस्यापि श्रुतस्यानुयोगद्वारादिग्रन्थदृष्टः सामाचार्यायातश्च सामान्येनोच्यते, इह सामायिकाध्ययनादिश्रुतपठनेच्छया शिष्ये समुपस्थिते गुरूः समवसरणस्थापनां विधाय वामपक्षकृतशिष्यः पूर्वाभिमुख उत्तराभिमुखो वा देवान् वन्दते ततश्च शिष्यं द्वादशावर्त्तवन्दनं दापयित्वा तेन सहैव योगोत्क्षेपनार्थं पञ्चविंशत्युच्छ्वासमानं कायोत्सर्गं करोति, पारितकायोत्सर्ग-
5 श्चतुर्विंशतिस्तवं पठति, ततश्च ऊर्ध्ववस्थित एव वारत्रयं पञ्चमङ्गलपाठपुरस्सरं ''नाणं पंचविहं पन्नत्त''मित्यादिनन्दिमुच्चारयति, तदन्ते प्रणिपत्योत्थितो ब्रूते विनेयः इच्छाकारेण अमुगं सुयं उद्दिसह, आचार्य इच्छापूर्वकमाह–उद्दिसामि खमासमणाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं, पुनः प्रणिपत्य शिष्य आह–संदिसह किं भणामो ?, गुरुराह—'वंदित्ता पवेयह' शिष्योऽपीच्छाम इति भणित्वा प्रणिपत्योत्थितो वक्ति–इच्छाकारेण तुब्भेहिं अमुगं सुयमुद्दिट्ठं इच्छामि अणुसट्ठिं' गुरुराह—
10 जोगं करेहत्ति, तत इच्छाम इत्युक्त्वा शिष्यः प्रणिपत्यान्तरे नमस्कारमुच्चारयन् गुरुं प्रदक्षिणयति, तदन्ते पुनः प्राह–तुब्भेहिं अमुगं सुअमुद्दिट्ठं इच्छामि अणउसट्ठिं, गुरुराह–जोगं करेहत्ति, तत इच्छामीत्युक्त्वा वन्दित्वा च नमस्कारपाठेन पुनर्गुरुं प्रदक्षिणयति पुनस्तेनैव क्रमेण तृतीयप्रदक्षिणापि वाच्या, ततश्च प्रदक्षिणात्रयान्ते गुरोः पुरतः शिष्योऽवतिष्ठते, गुरुश्चान्तरे निषीदति, ततश्चार्द्धावनतगात्रः शिष्यो भणति–तुब्भं पवेइयं संदिसह साहूणं पवेएमि, गुरुराह–पवेयहत्ति, शिष्यस्तु इच्छाम
15 इत्युक्त्वा प्रणिपत्य चोत्थितः पञ्चनमस्कारं पठति, पुनः प्रणिपत्योत्थितो वक्ति–तुब्भं पवेइयं साहूणं पवेइयं संदिसह करेमि काउस्सग्गं, गुरुराह–एवं करेहत्ति, ततः प्रणिपत्योत्थितो अमुगस्स उद्दिसावणियं करेमि काउस्सग्गं अन्नत्थ ऊससिएणमित्याद्युक्त्वा सप्तविंशत्युच्छ्वासमानं कायोत्सर्गं करोति, ततः पारितकायोत्सर्गश्चतुर्विंशतिस्तवं पठति, अत्र प्रदक्षिणावन्दनकत्रयेणाप्येकमेव गण्यते, ततः सप्तभिः क्षुल्लकवन्दनकैरङ्गादिश्रुतोद्देशोऽवसितो भवति, उद्देशे च कृतेऽङ्गाद्यन्यतरश्रुतमिदं भवतो
20 वाचयामीति किल गुरुणा प्रोक्तं भवति, समुद्देशेऽपि नन्द्याकर्षणादिरहितः क्षुल्लकवन्दनकसप्त-कादिस्वरूपः स एव विधिः, केवलं प्रवेदिते गुरुराह—स्थिरपरिचियं करेहत्ति, समुद्देशे च कृते विवक्षितसूत्रस्य स्थिरपरिचितत्वकरणाय किल शिष्यो नियुक्तो भवति, अनुज्ञायां तु योगोत्क्षेप-कायोत्सर्गवर्ज्जो नन्द्याकर्षणादिक उद्देशविधिरेव वक्तव्यो, नवरं प्रवेदिते गुरुराह–सम्मं धारय अन्नेसिं च पवेयसुत्ति, एवमसौ कालिकश्रुतेऽभिव्याहारः, उत्कालिकदृष्टिवादेऽपीत्थमेवाभिव्याहारः,
25 केवलं शिष्येण अमुगं सुयं उद्दिसह इत्युक्ते गुरुस्तत्रेत्थमाह—इहमुद्दिस्सामीत्यादि । **'करणे यत्ती'**त्यादि (३०६-४),न केवलं करणेयत्तीत्युपन्यस्तद्वारपरामर्शः किन्तु भयेयत्तीत्ययमपीति योजना, अयमत्र भावार्थो–यदिदमनन्तरोदितं सामायिककरणं तद्भावकरणं, क्व पुनर्भावकरणं शास्त्रकारेण पूर्वमुद्दिष्टं येनेदमिह योज्यते इत्याह—''करणे य भए य''त्ति, इदं हि प्रागुपन्यस्तद्वारगाथाद्यद्वारद्वयं,

अनेन च सकलापि सा गाथा सूचिता भवति, तद्यथा–'करणे भए य अन्ते सामाइअ सव्वए अ वज्जे य' इत्यादि अस्यां गाथायां यद्भावकरणमुक्तं शास्त्रकृता तदिदमनन्तरोदितं सामायिकरण-मित्यर्थः। '**भदि कल्याणे सुखे चे**'त्यादि (३०६-१०), ननु भदन्त इत्यखण्डे शब्दे सति कुतोऽयं प्रकृतिविभागो लभ्यते इत्याह–'**जृविशि**'इत्यादि (उ० ४१३), एतदुक्तं भवति– जृविशीतिधातुद्वयस्योणादौ तावदन्तप्रत्ययो दृश्यते, उणादयश्च बहुलं भवन्तीत्यत्रापि झच्प्रत्ययो लभ्यते, तस्मिँश्च सति सामर्थ्यात् भदिरूपैव प्रकृतिरभ्युह्यते । '**पश्चानुपूर्व्या ग्रन्थ**'इति (३०८-१०), होइ भयंतो इत्यादौ, किलैवमुपन्यासो भवति भदन्तो भवान्तो भयान्तश्चेति, अधिकारोपन्यासस्तु विपर्ययेण कृत इति पश्चानुपूर्वी कृता । '**आवस्सयंपि निच्चं**' गाहा (३०९-३), व्याख्या– अत्र किल कल्पग्रन्थनिबद्धेयं सामाचारी–यदि लघ्वी वसतिर्भवति तदा केचित्साधवः स्थानान्तरेऽपि परिवसन्ति, किन्तु गुरोरन्तिके समागत्य प्रतिक्रमणं कृत्वा प्रादोषिककालग्रहणानन्तरं कालं सूत्रार्थपौरुषीद्वयं च विधाय ततः स्थानान्तरे गत्वा निद्रामोक्षं विदधति, अथ मार्ग्गे श्वापदादिभयं तदाऽर्थपौरुषीं हापयन्ति अथ तथापि मार्ग्गभयादि किञ्चित् तर्हि सूत्रपौरुषीमपि त्यजन्ति ततश्चरमकायोत्सर्गं द्वितीयमाद्यं वा तावद् यावत्तिष्ठत्यपि सवितरि कारणतो वसत्यन्तरं गत्वा गुरुस्थापनादिक्रमेणान्यत्रापि स्थिताः प्रतिक्रमणादिषु यतन्ते यतोऽत्रापि भदन्त इत्यामन्त्रणं कुर्वते इति दर्शितं भवति, किं तद् इत्याह–आवश्यकं प्रतिक्रमणादिलक्षणं नित्यमेव गुरुचरणमूले कर्त्तव्यमिति, कस्यैतद्दर्शितं भवतीत्याह–'**वीसुंपि हु संवसतो कारणतो**'त्ति (३०९-३), एकप्रतिश्रयनिवासिना तावद्गुर्वन्तिक एवावश्यकं कार्यं योऽपि कारणतो वसन्तिसङ्कीर्णतादेर्विष्वक्– पृथग् वसति तस्याप्यनन्तरदर्शितकल्पोक्तनीत्या गुरुचरणान्तिक एवावश्यकं कर्त्तव्यतया दर्शितं भवति, ननु यः श्वापदभयात्कारणतो गुर्वन्तिकाद्रात्रौ गन्तुं न शक्नोति स किं करोतीत्याह–'जयति सेज्जाए'त्ति, कारणात इतीहापि सम्बध्यते, ततश्च यद्यपि श्वापदभयादिकारणतो गुर्वन्तिकं गन्तुं न शक्नोति तथाप्यन्यस्यामपि शय्यायां परिवसन् गुरुस्थापनादिक्रमेणैव यतते–यतनां करोतीति गाथार्थः ॥ '**सम्पूर्णशब्दावयवमेवाधिकृत्याहे**'त्यादि (३१०-५), इह 'सामं समं चे'त्यादि खण्डीकृतशब्दापेक्षया सामायिकमित्यखण्डः–सम्पूर्णः शब्द उच्यते, 'करणे भए य अंते सामाइय सव्वए य वज्जे ये'त्यादिगाथैकदेशत्वादवयवः ततश्च सम्पूर्णशब्दश्चासावावयवश्च सम्पूर्णशब्दावयवस्तमधिकृत्य सामं समं सम्यक् इकं इत्येते चत्वारोऽपि शब्दा एकार्थाः, एकार्थत्वं चेह न पर्यायशब्दत्वममीषां मन्तव्यं किन्त्वेकस्यैव सामायिकशब्दलक्षणस्यार्थस्य निष्पत्तये सामादयश्चत्वारोऽपि शब्दा व्याप्रियन्त इत्येकार्था उच्यन्त इति । '**ओघतो मधुरपरिणाम**'मित्यादि (३१०-११), ओघतः–सामान्येन तावन्मधुरपरिणाम–शर्क्करादिद्रव्यं, विशेषतस्तु कस्यचित्

स्वसात्म्यादिकारणात्कटुकमपि मधुरमिवाभातीति भावः । '**भूतार्थालोचनायां समं तुलाद्रव्य**'मिति, (३१०-११)भूतः—सद्भूतः तौल्ये कियत्प्रमाणोऽयमर्थ इत्यालोचनायां—तत्तौल्यप्रमाणजिज्ञासायां सत्यां यथावस्थितप्रतिपादकत्वेन समं तुलाद्रव्यमेवेत्यर्थः । '**कण्ठतस्तावदुक्ते चालनाप्रत्यवस्थाने**'इत्यादि (३१९-७), ननु च "को कारओ करिंतो" इत्यादौ परस्य कर्त्रादिस्वरूपं प्रश्नयतः सूरेरपि तत्कथयत उभयोरपि पुनरुक्तता, 'आया खलु सामइय'मित्यादिना तत्स्वरूपस्यानेकस्थानेषु पूर्वमेव निरूपितत्वाद् इत्याशङ्क्याह—'**अत एव चात्र पुनरुक्ते**'त्यादि, यत एव चालनाप्रत्यवस्थाने एते न स्वरूपकथनं अत एव न पुनरुक्तता, कुत इत्याह—'**अनुवादद्वारेणे**'त्यादि, एतदुक्तं भवति—यत्किमपि कर्त्रादिस्वरूपं सूरिरभिधास्यते तदहं निराकरिष्यामीति चालनाचिकीर्षया परस्य प्रश्नो यद्यसौ तत्स्वरूपं मयोक्तं निराकरिष्यति तदहं स्थापयिष्यामीत्यभिप्रायवतश्च सूरेर्निर्वचनं न तु मुख्यतया तत्स्वरूपप्रतिपत्त्यर्थमित्यदोषः । '**विवक्षितं घृत**'मिति (३२१-३), प्रतिनियतैकभाजनादिस्थितं न पुनः समस्तजगद्गतमिति भावः । '**अत्र च (तु) क्षायोपशमिकभावसर्वेणाधिकार**'इति (३२४-२), सर्वशब्दोऽन्तर्ज्जल्पाकारः किल श्रुतज्ञानरूपः श्रुतं च क्षायोपशमिके भावे वर्तते अतो युज्यते क्षायोपशमिकभावसर्वेणाधिकार इति । '**दानपुण्यफला कीर्त्ति**'रिति (३३२-७), दानपुण्याभ्यां फलति २ कस्याचिद्दानसमुत्था अपरस्य तु तथाविधं दानमप्रयच्छतोऽपि पूर्वभवोपात्तपुण्यवशात्कीर्त्तिः प्रादुरस्तीति भावः । '**अन्यमपीत्यतिरिच्यत**'इति (३३४-४), करंतंपि अन्नं न समणुजाणामीत्यत्रापिशब्दोऽन्यशब्दश्चातिरिच्यत इत्यर्थः, तत्रापिशब्दस्य फलमाह—'**यस्मात् सम्भावनेऽपिशब्दोऽय**'मित्यादि (३३४-५) । अन्यशब्दफलमाह—'**न क्रियाक्रियावतो**'रित्यादि (३३४-९) । '**अतस्तद्भेदोपदर्शनाये**'ति (३३५-९), यतः सावद्यं योगं त्रिविधेन प्रत्याख्यात्यतस्तद्भेदोपदर्शनाय—सावद्ययोगप्रत्याख्यानभेदोपदर्शनाय 'सीयालं भंगसय'मित्यादि-गाथामाहेत्यर्थः । '**तो कह निज्जुत्तीए**'इत्यादि (३३७-१) गाथाव्याख्या—यदि प्रज्ञप्त्यां त्रिविधं त्रिविधेन गृहिणः प्रत्याख्यानमुक्तं ततः कथं निर्युक्त्यां वक्ष्यमाणप्रत्याख्यानाध्ययनसम्बन्धिन्यां "अणुमइनिसेहो"त्ति अनुमतिप्रत्याख्यानस्य निषेधः क्रियमाणो घटते, तथाहि—तत्र 'दुविहं तिविहेण पढमो'इत्याद्येव वक्ष्यति, न पुनः 'तिविहं तिविहेणं पढमउ'त्ति एवं परेणोक्ते सत्युत्तरमाह—(सो सविसयंमित्ति) स निर्युक्तावनुमतिप्रत्याख्याननिषेधः स्वविषये मध्यमखण्डादिरूपे यत आयातं वस्तु—वस्त्रहिरण्यश्रीखण्डादि परिभुङ्क्ते तद्विषयो द्रष्टव्यो, विषयबहिर्वर्त्तिस्वयम्भूरमणमत्स्यादिप्रत्याख्यानविषयं तु प्रज्ञप्त्यां त्रिविधं त्रिविधेनेत्युक्तमित्यदोषः, समाधानान्तरमाह—'**सामन्ने वा नत्थी**'त्यादि (सामण्णेणं नत्थि) यो वा अमुकक्षेत्रवर्त्तिन इति विशेषमन्तरेण सामान्यतो द्वीन्द्रियादयो मया न हन्तव्या इत्येवं प्रत्याख्याति तस्य नास्त्येव त्रिविधं त्रिविधेन प्रत्याख्यानं, तद्विषयः स निर्युक्तावनुमतिनिषेधः,

प्रज्ञप्त्यां तु स्वयम्भूरमणाद्याधारविशेषितजन्तुप्रत्याख्यानविषयाऽनुमतिप्रत्याख्यानाभ्यनुज्ञेति न दोष इति गाथार्थः। '**आह कहं पुण मणसा**' गाहा (३३७-३) व्याख्या—पर आह—ननु च वाक्कायाभ्यां तावत्प्रत्यक्षादिप्रमाणत एव करणकारणानुमतयो दृश्यन्ते मनसस्तु ता नोपलभ्यन्ते तत्कथं तास्तत्र प्रत्येतव्या इत्याह—यथा वाग्योगतनुयोगाभ्यां करणकारणानुमतयः तथा मनसापि भवन्त्येव, कुत इत्याह—'तदधीणत्ता वइतणुकरणाईण' मित्यनन्तरगाथायां सम्बन्धः, एतदुक्तं भवति—वाक्तन्वोः सम्बन्धीनि यानि करणानि करणकारणानुमयत इत्यर्थः तानि मनोऽधीनान्येव भवन्ति, नहि मनोविकल्पमन्तरेण प्रायस्तनुवचनाभ्यां करणादीनि प्रवर्त्तन्ते अतो मनस्यपि तनुवचनकरणाद्युपचारः क्रियत इति भावः, यदिवा किमत्रोपचारेण ?, यदा हि निर्व्यापारतनुवचनोऽपि सावद्ययोगकरणादि मनसा विकल्पयति तदा मुख्यतयाऽपि तनुवचनवन्मनस्यपि करणादीनि सम्भवन्त्येवेति, आह च—'अह मणकरणं सावज्जजोगमणण'-मित्यादि भावितमेवेति। '**अर्थविकल्पसङ्ग्रहार्थं न पुनरुक्त**'मिति (३४४-८), अर्थो—मनःप्रभृतिकरणलक्षणः तस्य विकल्पा—भेदाः तत्सङ्ग्रहार्थं त्रिविधेनेत्युच्यमानं न पुनरुक्तं, एतदुक्तं भवति—य एव मनसा वाचा कायेनेत्यनन्तरं सविस्तरं वक्ष्यमाणोऽर्थः स एव त्रिविधेनेत्यनेन सङ्गृह्योक्तोऽतः सङ ग्रहपदत्वादपुनरुक्तमिदमिति। '**अथवा अत्राणमतीतसावद्ययोग**'मित्यादि (३५१-१२), न त्राणं अत्राणं—संसारभयात् त्रातुमसमर्थं सावद्यं योगं जुगुप्से इत्यर्थः, कस्मादित्याह—अधुना सामायिकेन त्राणं मम भविष्यतीति हेतोः, लब्धे हि साम्प्रतं त्राणरूपे सामायिके तमत्राणस्वरूपं सावद्यं योगं व्युत्सृजामीतिभावः। '**नन्वेवं सावद्ययोगपरित्यागादि**'त्यादि (३५२-३) अत्र किल परोऽतीवासम्बद्धप्रलापितया विवक्षित-निर्दोषसम्बन्धेन सम्बन्धितमपि व्युत्सृजामि-शब्दमनिष्टसम्बन्धेन सम्बन्धयन्निदमाह—ननु चैवमुक्तन्यायेन 'करेमि भंते ! सामाइय'मित्यादिसूत्रस्यायं तात्पर्यार्थो गम्यते, यदुत—सावद्ययोगपरित्यागेन करोमि भदन्त ! सामायिकमिति, एवं सति सावद्ययोगनिवृत्तिरत्र प्रतीयते, पर्यन्ते च 'तस्स भंते !पडिक्कमामी'त्यादौ तस्य व्युत्सृजामीतिशब्दप्रयोगे सतीदमनिष्टमापद्यते तस्य—अनन्तरसामर्थ्यलब्ध-सावद्ययोगनिवर्त्तनस्य व्युत्सृजामि—सावद्ययोगस्य निवृत्तिमुत्सृज्य प्रवृत्तिं विदधामीत्यर्थः, अत्रोत्तरमाह—'**तन्ने**'त्यादि (३५२-५), यदि ह्येवमुल्लण्ठतया सम्बन्धः क्रियते तर्हि यदा कश्चित् 'मंसं पच्चक्खामि अन्नत्थणाभोगेण'मित्यादिना मांसविरतिमभिधाय पर्यन्ते व्युत्सृजामीति ब्रवीति तदाऽत्राप्यानन्तरोक्तां मांसविरतिं व्युत्सृजामीत्यनिष्टसम्बन्धः स्याद्, अथात्र मांसविरतिविपक्ष एव त्याज्यत्वेन मनसि विवक्षितो मनोगत एव च भावः प्रत्याख्यानं भवतीति नानिष्टः सम्बन्धः क्रियते, यद्येवं सर्वं सुस्थमिहापि सावद्ययोगनिवृत्तिविपक्षस्य हेयत्वेनाभिप्रेतत्वादिति। '**त्रिविधं त्रिविधेन व्युत्सृजति पापमेष्य**'मित्यादि (३५६-७), विशेषत एष्यमिति ब्रुवाणस्य कोऽभिप्रायः ?, उच्यते, सावद्ययोगविरत

इत्यनेनैव गतार्थे त्रिविधं त्रिविधेन व्युत्सृजति पापमिति यद्द्वितीयपदोपादानं तेनैवं किल ज्ञापयति यत्र सावद्ययोगे प्रवृत्तिरासीत् ततो निवृत्त इति प्रतिपादितं 'सावज्जजोगविरओ'इत्यनेन पदेन यदेष्यं पापं ततोऽनिवृत्त एव किल एष प्रतीयते अतस्तन्निवृत्तिप्रतिपादकं द्वितीयपदमिति विशेषत उक्तं वृत्तिकृता त्रिविधं त्रिविधेन व्युत्सृजति पापमेष्यमिति, कदा पुनरयमेवंविधः कर्त्ता भवतीत्याह—

5 '**सामायिकादौ**' (३५६-८), सामायिकारम्भसमय इत्येवं सम्बन्धो, यदा तु सामायिकादौ सूत्र इत्यनेन द्वितीयव्याख्यानेन 'करेमि भंते ! सामाइय' मित्यादिसूत्रं गृह्यते तदेत्थं सम्बन्धः, एषोऽनुगमः परिसमाप्तः, क्व विषये योऽसावनुगम इत्याह—'सामायिकादौ सूत्रे' करेमि भंते ! सामाइयमित्यादिसूत्रविषय इत्यर्थः । सामायिकाध्ययनं समाप्तमिति ॥

॥ इति म. हेमचन्द्रसूरिकृतटीप्पणकस्य चतुर्थो विभागः समाप्त ॥

પરિશિષ્ટ–૨

❁ પારિણામિકીબુદ્ધિ ઉપર અભયકુમારનું દૃષ્ટાન્ત ❁

(ગા. ૯૪૯માં આપેલ કથાનકનો વિસ્તાર)

રાજગૃહનામના નગરમાં જગતમાં પ્રસિદ્ધ શ્રેણિકનામના રાજા હતા. તેને ચારે પ્રકારની બુદ્ધિવાળો, ચારેબાજુ જેનો યશ વિસ્તરેલો છે એવો અભયનામનો પુત્ર મંત્રીરૂપે હતો. હવે ઉજ્જયિનીનગરીના ઘણા સૈન્યપરિવારથી યુક્ત પ્રદ્યોતરાજા રાજગૃહને ઘેરી લેવા આવતો હતો. આથી ચિત્તમાં ભય વહન કરતાં શ્રેણિતરાજાને અભયમંત્રીએ કહ્યું કે, 'તમે થોડી પણ બીક ન રાખશો, હું તેઓને હમણાં જ હાંકી કાઢું છું.' પ્રદ્યોતરાજાને લડવા આવતા જાણીને, તેમની સાથે આવનારા બીજા ખંડિયારાજાનાં પડાવ-સ્થાનોની ભૂમિમાં લોઢાના ઘડાઓની અંદર સોનામહોરો ભરીને એવી રીતે દટાવી કે, જેથી કોઈ બીજો મેળવી ન શકે. ત્યાર પછી તેઓ સર્વે આવ્યા અને પોતપોતાના યોગ્ય સ્થાને પડાવ નાખ્યો. પ્રદ્યોતરાજા સાથે શ્રેણિકને મોટો સંગ્રામ થયો. કેટલાક દિવસો પછી અભયે અંતર જાણીને તેની બુદ્ધિનો ભેદ કરવા માટે પ્રદ્યોત ઉપર એક લેખ મોકલ્યો કે – 'તમારા સર્વે રાજાઓને શ્રેણિકરાજાએ ઉપકારથી દબાવીને ફોડી નાખ્યા છે. તે સર્વે મળીને તરતમાં જ તમોને શ્રેણિકરાજાને સ્વાધીન કરશે, આ બાબતની જો મનમાં શંકા હોય તો અમુક રાજાના અમુક પ્રદેશમાં તમે ખોદાવીને ખાત્રી કરો.' તેણે ખોદાવીને ખાત્રી કરી તો સોનામહોરો ભરેલા ઘડા જોયા, એટલે એકદમ પ્રદ્યોતરાજા ત્યાંથી નાઠો. શ્રેણિકરાજા તેની પાછળ પડ્યા અને તેનું સૈન્ય વેરવિખેર કરાવી નાંખ્યું. કોઈ પ્રકારે સર્વે રાજાઓ ઉજ્જયિનીનગરીએ પહોંચી ગયા અને કહેવા લાગ્યા કે, 'હે સ્વામી ! અમે એવી લાંચ લેનારા અને તમને સોંપી દેનારા અધમ કાર્ય કરનારા નથી, પરંતુ આ સર્વ અભયકુમારનું કાવત્રું છે.' પોતાને પાકી ખાત્રી થઈ, એટલે કોઈક સમયે સભામાં કહેવા લાગ્યો કે – 'એવો કોઈ નથી કે, જે અભયને મારી પાસે આણે ?' તેમાં એક ચતુર ગણિકાએ આ બીડું ઝડપ્યું અને સાથે માગણી કરી કે મને સાથે આટલી સામગ્રી આપો. મધ્યમ વયની સાત ગણિકા-પુત્રીઓ, સહાય કરનારા કેટલાક વૃદ્ધપુરુષો, તેમજ માર્ગમાં ખાવા માટે ઘણું ભાથું આપ્યું. પહેલાં આ ગણિકાઓએ સાધ્વીઓ પાસે બનાવટી શ્રાવિકાપણું શીખી લીધું. એમ કર્યા પછી રાજગૃહની બહાર ઉદ્યાનના મંદિરોમાં વંદન-દર્શન કરવા ગયા. ચૈત્યપરિપાટી કરતાં કરતાં અનુક્રમે અભયકુમારના ઘરદેરાસરમાં આવ્યા અને 'નિસીહિ' પૂર્વક પ્રવેશ કર્યો. અભયકુમારે પૂછ્યું કે, 'ક્યાંથી આવવાનું થયું છે ?' તેઓએ કહ્યું 'અવંતીનગરીમાં અમુક શેઠ મૃત્યુ પામ્યા અને તેમના પુત્રો પણ મૃત્યુ પામ્યા. હું અને આ મારી પુત્રવધૂઓ છે. પતિ મૃત્યુ પામ્યા પછી અમે વૈરાગ્ય પામ્યા છીએ. દીક્ષા લેવાની અભિલાષા થયેલી હોવાથી અને દીક્ષા લીધા પછી અધ્યયન કરવું, વિહારાદિ કરવા વિગેરેમાં રોકાયેલાં રહેવું પડે, જેથી કલ્યાણક ભૂમીઓ-તીર્થભૂમીઓનાં દર્શન-વંદન ન કરી શકાય- આથી અમો ચૈત્યાદિકનાં દર્શન, તીર્થભૂમિઓની ફરસના

કરવા નીકળેલા છીએ. અભયે પૂર્ણ ભાવથી તેમને કહ્યું કે, 'આજે તમો મારા મહેમાન થાઓ.' તેઓએ કહ્યું કે, 'આજે કલ્યાણક હોવાથી અમારે ઉપવાસ છે.' કોમલ મધુર વચનોથી કેટલીક ધર્મ-ચર્ચાઓ કરી લાંબા સમય સુધી બેસી પોતાના સ્થાને ચાલી ગઈ. તેમના શ્રાવકપણાંના ગુણોથી આકર્ષાયેલો અભય બીજા દિવસે પ્રભાતે એકલો અશ્વારૂઢ થઈ તેમની સમીપે ગયો અને કહ્યું કે, 'આજે તો પારણું કરવા મારા ઘરે ચાલો.' તેઓ અભયને કહેવા લાગી કે, 'પ્રથમ તમે અહીં અમારે ત્યાં પારણું કરો.' એમ જ્યારે તેઓ બોલી, એટલે અભય વિચારવા લાગ્યો કે - 'જો હું તેમના કહેવા પ્રમાણે અમલ નહીં કરીશ, તો નક્કી આ મારે ત્યાં નહીં આવે.' તેથી અભયે ત્યાં ભોજન કર્યું. મૂર્ચ્છા પમાડનાર અનેક વસ્તુથી તૈયાર કરેલ મદિરાનું પાન કરાવ્યું. એટલે સૂઈ ગયો. અશ્વ જોડેલા રથમાં સુવરાવી એકદમ પલાયન કરાવ્યો. બીજા પણ આંતરે આંતરે ઘોડાઓ જોડેલાં રથો તૈયાર રખાવ્યા હતા. તેની પરંપરાથી અભયને ઉજ્જયિનીમાં લાવ્યા અને ચંડપ્રદ્યોતરાજાને સમર્પણ કર્યો. અભયે પ્રદ્યોતને કહ્યું કે, "આમાં તમારી પંડિતાઈ ન ગણાય, કારણ કે, અતિકપટી એવી આ ગણિકાઓએ ધર્મના નામે મને ઠગ્યો છે."

હવે પ્રદ્યોતરાજાને ચાર રત્નો ઘણા પ્રિય હતાં. ૧ શિવાદેવી, ૨. અગ્નિભીરુ નામનો રથ, ૩. અનલગિરિ હાથી. અને ૪. લોહજંઘ નામનો લેખવાહક (દૂત). તેને જો ઉજ્જયિનીથી દિવસે સવારે રવાના કર્યો હોય, તો ૨૫ યોજન દૂર રહેલ ભરૂચ નગરે સંધ્યા-સમયે પહોંચી જાય. હવે ભરૂચ નિવાસી લોકો વિચારવા લાગ્યા કે, 'આ પવનવેગને મારી નાખો, કારણ કે બીજો કોઈ ગણતરી કરાય તેટલા લાંબા દિવસે ઉજ્જયિનીથી અહીં આવે છે. જ્યારે આ લોહજંઘ તરત આવીને વારંવાર રાજાની આજ્ઞા લાવીને આપણને હેરાન પરેશાન કરે છે.' તેથી લોહજંઘને ભરૂચવાસીઓ માર્ગમાં ખાવા માટે ભાતું આપવા લાગ્યા. તે લેવા ઇચ્છતો ન હતો, છતાં પરાણે અપાવ્યું. તેમાં ખરાબ દ્રવ્યો મેળવીને લાડવારૂપ તેને બનાવ્યું. તેનાથી એક કોથળી ભરીને કેટલાક યોજન ગયા પછી ભોજન કરવા તૈયારી કરવા લાગ્યો. કોઈક પક્ષીએ તેને અટકાવ્યો. તેથી ઊભો થઈને ફરી ઘણે દૂર જઈને ખાવા લાગ્યો, તો ત્યાં પણ એવી રીતે ખાતાં અટકાવ્યો. એ જ પ્રમાણે ત્રીજી વખત પણ તેને લાડવો ખાતાં રોક્યો, વિચાર્યું કે આમાં કંઈ પણ અભ્યંતર કારણ હોવું જોઈએ. પ્રદ્યોતરાજાના ચરણ-કમળ પાસે જઈ પોતાનું કરેલું કાર્ય નિવેદન કર્યું. તથા ભોજનમાં વારંવાર કેમ વિક્ષેપ આવ્યો ? તે માટે રાજાએ અભયને બોલાવીને પૂછ્યું. અભયે કહ્યું 'આમાં ખરેખર ખરાબ દ્રવ્યો ભેગાં કરીને લાડવો બનાવ્યો છે અને તે દ્રવ્યોના સંયોગથી દૃષ્ટિવિષ સર્પ ઉત્પન્ન થયો છે.' તે કોથળી ઉઘાડતાં જ સાચેસાચ તે પ્રગટ દેખાયો. હવે આ સર્પનું શું કરવું ? 'અવળા મુખે અરણ્યમાં તેને છોડી દેવો.' મૂક્તાની સાથે જ તેની પોતાની દૃષ્ટિથી વનો બળીને ભસ્મ બની ગયાં, તેમજ અંતર્મુહૂર્તમાં તે મરી ગયો. એટલે પ્રદ્યોતરાજા અભય ઉપર પ્રસન્ન થયો અને કહ્યું કે, 'બંધનમુક્તિ સિવાય બીજું વરદાન માગ, તો અભયે કહ્યું કે 'હાલ આપની પાસે થાપણ તરીકે અનામત રાખી મૂકો.'

હવે કોઈ વખત હાથી બાંધવાના સ્તંભથી અનલગિરિ હાથી એકદમ મદોન્મત્ત ગાઢ મદવાળો બની છૂટી ગયો. ત્યારે રાજાએ અભયને પૂછ્યું કે, 'શું કરવું ?' ત્યારે અભયે કહ્યું, '(વત્સદેશનો) ઉદયનરાજા જો વાસવદત્તા (પ્રદ્યોતરાજાની પુત્રી) કન્યાની સાથે ભદ્રવતી હાથણી ઉપર બેસીને ગાયન સંભળાવે તો હાથી વશ થાય.' પ્રદ્યોતે ઉપાયપૂર્વક પોતાના વશમાં લીધેલા ઉદયન રાજાને અને પોતાની પુત્રી વાસવદત્તાને અનલગિરિ પાસે જઈ ગાયન કરવા કહ્યું. ગાયન ગાયું, હાથી વશ થયો, એટલે બાંધી લીધો. ફરી અભયને વરદાન આપ્યું, એટલે થાપણ રૂપે રાખ્યું. કોઈક સમયે અવંતીમાં રાક્ષસી અગ્નિ ઉત્પન્ન થયો કે જે ધૂળ, પાષાણ, ઈંટાળા વગેરેથી પણ વધારે સળગે છે. એમ કરતાં મોટો ભયંકર નગરદાહ ઉત્પન્ન થયો, ત્યારે રાજા ચિંતવવા લાગ્યો કે, 'અત્યારે અહીં કેવી વિપરીત આપત્તિ ઊભી થઈ છે !' અભયને પૂછ્યું. ત્યારે તેણે કહ્યું કે – 'જાણકાર લોકોનું એવું કથન છે કે, 'આ વિષયમાં લુચ્ચા પ્રત્યે લુચ્ચાઈ અને ઝેરનું ઔષધ ઝેર, તેમ અગ્નિનો શત્રુ અગ્નિ અને થીજેલાનો શત્રુ પણ અગ્નિ-ઉષ્ણતા છે.' ત્યાર પછી જુદી જાતિનો અગ્નિ વિકુર્વ્યો. તે પ્રયોગથી નગરદાહ શમી ગયો. એમ ત્રીજું વરદાન મેળવ્યું અને તે પણ થાપણ તરીકે હાલ રાજા પાસે અનામત રખાવ્યું.

કોઈ વખત ઉજ્જયિની નગરીમાં ભયંકર રોગચાળો ઉત્પન્ન થયો. અભયને ઉપાય પૂછતાં તેણે આ પ્રમાણે પ્રત્યુત્તર આપ્યો -

'અંતઃપુરની બેઠકસભામાં શૃંગાર કરેલા દેહવાળી અને વસ્ત્રાભૂષણથી સજ્જ થયેલી સર્વ રાણીઓ તમારી પાસે આવે અને જે કોઈ જલદી તમને પોતાની દૃષ્ટિથી જિતે, તે મને જણાવો.' તે પ્રમાણે કરતાં શિવાદેવી સિવાય તમામ રાણીએ અધોમુખ કર્યું. એટલે રાજાએ અભયને કહ્યું કે, 'તારી માતા સરખી શિવાએ મને જિત્યો.' એટલે અભયે કહ્યું કે, 'એક આઢકપ્રમાણ બલિ ગ્રહણ કરી, વસ્ત્રરહિતપણે રાત્રે તે શીવાદેવી કોઈ ગવાક્ષ વગેરે સ્થળમાં ભૂત ઊભું થાય, તેના મુખમાં બલિકૂર ફેંકે તો અશિવ શાંત થાય.' તેમ કર્યું. એટલે અશિવ-ઉપદ્રવ શમી ગયો. ત્યારે ચોથું વરદાન મેળવ્યું. અભયે વિચાર્યું કે 'પારકા ઘરે કેટલા દિવસ સુધી રોકાઈ રહેવું ? મારે મારી જાતને છોડાવવી જોઈએ.'

તેથી પૂર્વે જે વરદાનની થાપણ રાખેલી, તે રાજા પાસેથી માગે છે. તે આ પ્રમાણે 'અનલગિરિ હાથી પર આપ મહાવત બનો, અગ્નિભીરુ રથમાં લાકડાં ભરીને શિવાદેવીના ખોળામાં બેસી હું અગ્નિમાં પ્રવેશ કરું.' - આવી મારી છેલ્લી ઇચ્છા છે, તો આપેલા વચનનું પાલન કરો.

એટલે પ્રદ્યોતે વિચાર્યું કે, હવે અભય પોતાના સ્થાને જવા માટે ઉત્કંઠિત થયો છે. એટલે મોટા સત્કાર કરવા પૂર્વક અભયને વિસર્જિત કર્યો. ત્યારે અભયકુમારે કહ્યું કે, 'તમે મને ધર્મના નામે કપટથી અહીં અણાવ્યો છે. જો હું દિવસના સૂર્યની સાક્ષીએ પ્રદ્યોત હરાય છે એ રીતે બૂમ બરાડા પાડતાં તમને નગરીલોક-સમક્ષ બાંધીને ન હરી જાઉં, તો મારે અગ્નિમાં પ્રવેશ કરવો.' આવી પ્રતિજ્ઞા કરીને રાજગૃહમાં પહોંચ્યો. કેટલાક દિવસ ત્યાં રોકાઈને પછી સમાન આકૃતિવાળી

બે ગણિકા-પુત્રીઓને સાથે લઈને વેપાર કરવા કેટલુંક કરિયાણું સાથે લઈને વેપારીનો વેષ ધારણ કરીને ઉજ્જયિનીમાં અપૂર્વ દુર્લભ પદાર્થોનો વેપાર શરું કર્યો. રાજમહેલના માર્ગે રહેવાનો એક બંગલો રાખ્યો. પ્રદ્યોતરાજાએ કોઈક દિવસે વિશેષ પ્રકારના વસ્ત્રાભૂષણની સજાવટ કરેલી તે બંને સુંદરીઓને ગવાક્ષમાં રહેલી દેખી. વિશાળ ઉજ્જવલ પ્રસન્ન દૃષ્ટિથી બંનેએ રાજા તરફ નજર કરી. તેના ચિત્તને આકર્ષવા માટે મંત્ર સમાન બે હાથ જોડી અંજલિ કરી. તેના તરફ આકર્ષાયેલા મનવાળો તે રાજા પોતાના ભવન તરફ ગયો. પરસ્ત્રી લોલુપતાવાળા રાજાએ તેમની પાસે દૂતી મોકલી. કોપાયમાન થયેલી એવી તે બંનેએ દાસીને હાંકી કાઢતાં કહ્યું કે, 'રાજાનું ચરિત્ર આવું ન હોઈ શકે.' ફરી બીજા દિવસે આવીને દાસી પ્રાર્થના કરવા લાગી, તો રોષવાળી તેમણે તિરસ્કાર કર્યો. વળી કહ્યું કે, 'આજથી સાતમાં દિવસે અમારા દેવમંદિરોમાં યાત્રામહોત્સવ થશે, ત્યાં અમારો એકાંત મેળાપ થશે, કારણ કે અહીં તો અમારું ખાનગી રક્ષણ અમારા ભાઈ કરે છે.'

હવે અભયકુમારે પ્રદ્યોતરાજા સરખી આકૃતિવાળા એક મનુષ્યને ગાંડો બનાવીને લોકોને કહ્યું કે, 'આ મારો ભાઈ દૈવયોગે આમ ગાંડો બની ગયો છે. હું તેની દવા-ઔષધ-ચિકિત્સા કરાવું છું. બહાર જતાં રોકું છું. તો પણ નાસી જાય છે. વળી ઉંચકીને રાડારોળ કરતાં તેને પાછો લાવું છું. 'અરે ! હું ચંડપ્રદ્યોતરાજા છું, આ મારું હરણ કરે છે' — એમ વચન બોલતા તેને અભયે લોકોને વિશ્વાસમાં લીધા. સાતમાં દિવસે તે ગણિકાપુત્રીઓએ દૂતી મોકલાવીને એમ સંદેશો કહેવરાવ્યો કે, 'રાજાએ મધ્યાહ્ન-સમયે અહીં એકલાએ જ આવવું.' કામાતુર રાજા પરિણામનો વિચાર કર્યા વગર ગૃહગવાક્ષની ભિત્તિ દ્વારા આવ્યો. આગળથી કરેલી ગોઠવણ પ્રમાણે મજબૂત પુરુષોએ તેને સખત બાંધ્યો. પલંગમાં સૂવરાવી દિવસના સમયમાં જ બૂમ પાડતો હોવા છતાં અભયે કહ્યું કે, 'આ ગાંડા ભાઈને વૈદ્યની શાળામાં લઈ જાઉં છું.' એ પ્રમાણે અસંબંધ બોલતા રાજાને વાયુસરખી ગતિવાળા અશ્વો જોડેલા રથમાં બેસારીને જલદી રાજગૃહમાં પહોંચાડ્યો. શ્રેણિક રાજા તલવાર ઉગામીને તેના તરફ દોડે છે, ત્યારે અભયે તેમને રોક્યા. 'તો શું કરવું ?' એમ પૂછતાં કહ્યું કે, 'આ મહાપ્રભાવક અને ઘણા રાજાઓને માનનીય છે, માટે સારો સત્કાર કરીને તેમને નગરીમાં પહોંચાડવા.' તેમ કરવાથી બંનેનો સ્નેહ વૃદ્ધિ પામ્યો. અભયકુમારની આવા આવા પ્રકારની પારિણામિકી બુદ્ધિ હતી. (ઇતિ ઉપદેશપદભાષાન્તરમાંથી ઉદ્ધૃત)

❁ પારિણામિકબુદ્ધિ ઉપર અમાત્યનું દૃષ્ટાન્ત ❁

(ગા. ૯૪૯માં આપેલ અમાત્યકથાનો વિસ્તાર)

કાંપિલ્યપુર નગરમાં બ્રહ્મ નામે રાજા હતો. તેને ચુલણી નામે રાણી હતી. તેની કુક્ષિથી ચૌદ સ્વપ્નવડે સૂચિત પુત્ર જન્મ્યો. તેનું બ્રહ્મદત્ત નામ પાડવામાં આવ્યું. હવે બ્રહ્મરાજાને બીજા ચાર રાજાઓ મિત્ર હતા. પહેલો કણેરદત્ત નામે કુરુદેશનો રાજા, બીજો કાશીદેશનો અધિપતિ કટકદત્ત નામે રાજા, ત્રીજો કોશલપતિ દીર્ઘ નામે રાજા અને ચોથો અંગપતિ પુષ્પચૂલ નામે રાજા હતો. પાંચમો પોતે હતો. એ પાંચેને પરસ્પર અતિગાઢ મિત્રતા હતી. તેઓ ક્ષણ માત્ર પણ એક

બીજાનો વિયોગ સહન કરી શકતા નહોતા. તે પાંચે જણા પ્રતિવર્ષ અનુક્રમે એક એકના શહેરમાં જઈને એકટા રહેતા હતા.

એ પ્રમાણે એક વખત પાંચે રાજાઓ કાંપિલ્યપુરમાં એકઠા મળ્યા હતા. તે વર્ષે બ્રહ્મ રાજા મસ્તકના વ્યાધિથી પરલોકવાસી થયા. તે વખતે બ્રહ્મદત્ત કુમાર બાર વર્ષની લઘુવયનો હતો. તેથી ચારે મિત્રોએ વિચાર્યું કે આપણા પ્રીતિપાત્ર, પરમમિત્ર બ્રહ્મરાજા પંચત્વ પામ્યા છે અને તેનો પુત્ર નાનો છે, માટે આપણામાંથી એકેક જણે દર વર્ષે આ રાજ્યની રક્ષા કરવા માટે અહીં રહેવું.' એ પ્રમાણે વિચાર કરી દીર્ઘરાજાને ત્યાં મૂકી બીજા ત્રણ રાજાઓ પોતપોતાને નગરે ગયા. દીર્ઘરાજાએ ત્યાં રહેતાં બ્રહ્મરાજાના અંતઃપુરમાં જતાં આવતાં એક દિવસ ચુલણીરાણીને નવયૌવના જોઈ, તેથી તે કામરાગથી પરાધીન થયો. ચુલણી પણ દીર્ઘરાજાને જોઈને રાગવતી થઈ. બંનેને પરસ્પર વાતચીત થતાં મહાન કામરાગ ઉત્પન્ન થયો. તેથી તે બંનેને પરસ્પર શરીરસંબંધ થયો. અનુક્રમે દીર્ઘરાજા પોતાની સ્ત્રીની માફક ચુલણી રાણીની સાથે ભોગ ભોગવવા લાગ્યો. તેણે કોઈનો ભય ગણ્યો નહિ. લોકાપવાદનો ડર પણ તજી દીધો. ધનુનામના વૃદ્ધમંત્રીએ આ બધી હકીકત જાણી, તે મનમાં વિચારવા લાગ્યો કે 'અરેરે ! આ દુષ્ટ, દીર્ઘરાજાએ બહુ જ અવિચારી કાર્ય કર્યું. અન્ય ત્રણ મિત્રોએ પણ શો વિચાર કરીને આને રાજ્યનો અધિકાર સોંપ્યો ? એમણે પણ વિપરીત કાર્ય કર્યું. આ દીર્ઘ રાજા પોતાના મિત્રની સ્ત્રીની સાથે વ્યભિચાર કરતાં લજ્જા પણ પામતો નથી.' એ પ્રમાણે વિચારી ઘરે આવી પોતાના પુત્ર વરધનુને આ હકીકત જણાવી. તેણે જઈને બ્રહ્મદત્તને આ ખબર કહી. તે સાંભળી બ્રહ્મદત્ત અતિક્રોધિત થઈ રક્ત નેત્રવાળો થયો. પછી દીર્ઘરાજા સભામાં બેઠો અને તે વખતે સભામાં જઈને કોયલ અને કાગડાનો સંગમ કરાવી કહેવા લાગ્યો કે 'અરે દુષ્ટ કાગ ! તું કોકિલની સ્ત્રી સાથે સંગમ કરે છે એ અતિ અયુક્ત છે. આ તારું અયોગ્ય આચરણ સહન કરીશ નહિ'. એમ કહી કાગને હાથમાં પકડી મારી નાખ્યો અને લોક સમક્ષ કહ્યું કે 'જે કોઈ આવું દુષ્ટ કાર્ય મારા નગરમાં કરે છે અથવા કરશે તેને હું સહન કરીશ નહિ'. એ સાંભળીને દીર્ઘરાજાએ ચુલણીરાણીને કુમારની તે હકીકત જણાવી. ત્યારે ચુલણીએ કહ્યું કે 'એ તો બાલક્રીડા છે, તેનાથી શું બીઓ છો ? માટે સ્વસ્થ થાઓ.' એ પ્રમાણે કેટલાક દિવસો વ્યતીત થતાં ફરીથી બ્રહ્મદત્તે દીર્ઘરાજાની સમક્ષ હંસીને બગલાનો સમાગમ કરાવી પૂર્વવત્ જનસમૂહની આગળ કહ્યું. ભયથી આકુળ થયેલા રાજાએ ચુલણીરાણીને કહ્યું કે 'તારા પુત્રે આપણાં બેના સંબંધની હકીકત જાણી છે, તેથી આપણો નિઃશંક સમાગમ હવે શી રીતે થઈ શકે ? માટે તું તેને મારી નાખ, જેથી આપણે નિર્ભયપણે વિષયરસનો આસ્વાદ અનુભવીએ.' ચુલણીએ વિચાર્યું કે 'હું આવું અકાર્ય કેવી રીતે કરું ? પોતાના હાથે પોતાના પુત્રને મારી નાંખવો એ તદ્દન અયોગ્ય છે.' દીર્ઘરાજાએ ફરીથી રાણીને કહ્યું કે 'કુમારને મારી નાંખ, નહિ તો તારી સાથેના સંબંધથી સર્યું.' એ સાંભળીને રાણીએ વિચાર કર્યો કે વિષયસુખમાં વિઘ્ન કરનાર આ પુત્ર શા કામનો ? માટે તેને અવશ્ય મારી નાંખવો જોઈએ, પછી ચુલણીએ વિચાર કર્યો કે 'આ પુત્રને પણ મારવો અને યસની પણ રક્ષા કરવી જોઈએ, માટે પુત્રને મોટા મહોત્સવથી પરણાવી

એક લાક્ષાગૃહ કરાવી તેની અંદર સૂતેલા તેને બાળી નાંખું. જેથી લોકમાં મારો અપયશ ન થાય.' એ પ્રમાણે વિચાર કરી તેણે લાક્ષાગૃહ કરાવ્યું અને તેને ચુનાથી ધોળાવ્યું. પછી પુષ્પચૂલરાજાની પુત્રી સાથે મોટા મહોત્સવથી તેને પરણાવ્યો. તે સઘળું ધનુમંત્રીએ જાણ્યું અને મનમાં વિચાર કર્યો કે આ પાપિણીએ પુત્રને મારવાનો ઉપાય કર્યો છે. પણ હું તેની રક્ષા કરવાનો ઉપાય કરું. એ પ્રમાણે વિચાર કરી તેણે દીર્ઘરાજાની પાસે જઈને કહ્યું કે હે રાજન્ ! હું હવે વૃદ્ધ થયો છું. તેથી જો આપ આજ્ઞા આપો તો હું તીર્થયાત્રાએ જાઉં અને મારો પુત્ર વરધનુ આપની સેવા કરશે. એ સાંભળીને દીર્ઘરાજાએ વિચાર કર્યો કે આ મંત્રી દૂર રહ્યો કંઈક પણ વિપરીત કરશે, માટે તેને તો પાસે જ રાખવો સારો. એ પ્રમાણે મનમાં વિચાર કરી દીર્ઘરાજાએ કહ્યું કે તીર્થગમન કરવાનું શું કારણ છે ? અહીંઆ જ તીર્થરૂપ ગંગા છે, તેથી ગંગાને કિનારે દાનશાલામાં રહી દાન પુણ્ય કરો, અન્યત્ર જવાથી શું વિશેષ છે ?' ધનુમંત્રીએ એ વાત કબૂલ કરી. પછી ગંગાને કિનારે દાનશાલામાં રહીને તેણે લાક્ષાગૃહથી બે ગાઉ સુધી સુરંગ ખોદાવી, અને વરધનુ મારફત પુષ્પચૂલરાજાને જણાવ્યું કે 'આજ શયનભુવનમાં તમારી પુત્રીને બદલે સર્વ અલંકારોથી અલંકૃત કરીને કોઈ રૂપવતી દાસીને મોકલજો'. તેથી પુષ્પચૂલરાજાએ દાસીને મોકલી. બ્રહ્મદત્ત પોતાના પ્રાણપ્રિય મિત્ર વરધનુ સાથે શયનગૃહમાં આવ્યો. દાસી ત્યાં આવી. બ્રહ્મદત્ત તો એમ જ માને છે કે આ મારી પ્રાણવલ્લભા છે. દાસીનું સ્વરૂપ તે જાણતો નથી. તે વખતે વરધનુએ શ્રૃંગાર ઉપર કથા કહેવાનું શરું કર્યું. તે સાંભળવાના રસમાં મગ્ન થવાથી બ્રહ્મદત્તને પણ નિદ્રા આવી નહિ. હવે મધ્યરાત્રિએ સર્વલોકો સુઈ જતાં ચુલણીરાણીએ આવીને લાક્ષાગૃહને આગ લગાડી. તે લાક્ષાગૃહને, ચોતરફથી બળતાં જોઈને બ્રહ્મદત્તે કહ્યું કે 'હે મિત્ર ! હવે શું કરવું ?' ત્યારે વરધનુએ કહ્યું કે મિત્ર ચિંતા શા માટે કરો છો આ જગ્યા ઉપર પગનો પ્રહાર કરો. પછી બ્રહ્મદત્તે પગના પ્રહારથી સુરંગનું બારણું ઉઘાડ્યું. બંને જણ પેલી સ્ત્રીને ત્યાં જ રહેવા દઈને તે માર્ગે નાસી ગયા. સુરંગને છેડે મંત્રીએ પવનવેગી ઘોડા તૈયાર રાખ્યા હતા. બન્ને જણ તે બે ઘોડા ઉપર સવારી કરીને ભાગ્યા. પચાસ યોજન ગયા ત્યાં બંને ઘોડા અત્યંત શ્રમિત થવાથી મરી ગયા. તેથી તે બંને જણા પગે ચાલીને કોષ્ટકનગરે ગયા. ત્યાં કોઈ બ્રાહ્મણને ઘેર ભોજન લીધું અને તે બ્રાહ્મણની પુત્રી સાથે બ્રહ્મદત્ત પરણ્યો. પછી ઘણાં શહેરો અને ઘણાં ગામોમાં કોઈ ઠેકાણે ગુપ્ત રીતે અને કોઈ ઠેકાણે પ્રગટપણે ફરતાં ફરતાં તે બ્રહ્મદત્ત અનેક સ્ત્રીઓને પરણ્યો. એ પ્રમાણે એકસો વર્ષ ભમ્યા. અનુક્રમે કાંપિલ્યપુરમાં આવી દીર્ઘ રાજાને મારી નાંખીને પોતાનું રાજ્ય લીધું. પછી છ ખંડ સાધીને તે બારમો ચક્રી થયો. — ઇતિ ઉપદેશમાલા ભાષાન્તરમાંથી ઉદ્ધૃત.)

